M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 597

Title : Siddhanta kaumudi

597

597

सिद्धान्तकौमुदी (उत्तरार्द्धः)

	Sidhānta Kaumudi Uttarardh		Title
		Bhattoji Dixit	Author
			Editor
			Year, Vols.
			Publisher
597	Begins & Ends abruptly		Remarks

श्रीगणेशाय नमः ॥ छंदसि पुनर्वस्वोरेकवचनं ॥ द्वयोरेकवचनं वा स्यात् ॥ पुनर्वसुर्नक्षत्रं ॥ पुनर्वसू वा ॥ लोके तु द्विवचनं नित्यमे
व ॥ विशाखयोश्च ॥ प्राग्वत् ॥ विशाखा नक्षत्रं ॥ विशाखे वा ॥ षष्ठीयुक्तश्छंदसि वा ॥ षष्ठ्यंतेन युक्तः पतिशब्दः छंदसि घिसंज्ञो
वा स्यात् ॥ क्षेत्रस्य पतिना वयं ॥ इह वेति संयोगं विभज्य छंदसीत्यनुवर्त्यते ॥ तेन सर्वे विधयश्छंदसि वैकल्पिकाः ॥ बहुलं
छंदसीत्यादिरस्यैव प्रपंचः ॥ यचि भं ॥ नभोंगिरोमनुषां वत्युपसंख्यानं ॥ नभसा तुल्यं नभस्वत् ॥ भत्वाद्रुत्वाभावः ॥ अंगिरस्व
दंगिरः ॥ मनुष्वदग्ने ॥ जनेरुसीति विहित उसिप्रत्यये मनेरपि बाहुलकात् ॥ वृषण्वस्वश्वयोः ॥ वृषं वर्षकं वसु यस्य स वृष
ण्वसुः ॥ वृषा अश्वो यस्य स वृषणश्वः ॥ इहांतर्वर्तिनीं विभक्तिमाश्रित्य पदत्वे सति नलोपः प्राप्तो भत्वाद्बाध्यते ॥ अत एव पदांत
स्येति णत्वनिषेधोपि न ॥ अल्लोपो न इति तु न ॥ अनंगत्वात् ॥ अयस्मयादीनि छंदसि ॥ एतानि छंदसि साधूनि ॥ भपदसंज्ञा
धिकाराद्यथायोगं संज्ञाद्वयं बोध्यं ॥ तथा च वार्त्तिकं ॥ उभयसंज्ञान्यपीति वक्तव्यमिति ॥ स सुष्टुभा स ऋक्वता गणेन ॥ पदत्वात्कु
त्वं ॥ भत्वाज्जश्त्वाभावः ॥ जश्त्वविधानार्थायाः पदसंज्ञायाः भत्वसामर्थ्येन बाधात् ॥ नैनं हिन्वंत्यपि वाजिनेषु ॥ अत्र पदत्वा

वैदिकीप्र ञ्जश्त्वंभवात्कुत्वाभावात् ॥ तस्माद्धातोः ॥ छंदसिपरेपि ॥ व्यवहिताश्च ॥ हरिभ्यांयाह्योकआ ॥ आमंद्रैरिंद्रहरिभिर्याहि ॥ शेधिभवति वै०दि०१
॥सि०कौ०॥ भ्यांच ॥ आभ्यांपरोलिट्कित्स्यात् ॥ समीधेदस्युहंतमं ॥ पुत्रईधेअथर्वणः ॥ बभूव ॥ इदंप्रत्याख्यातं ॥ इन्धेश्छंदोविषयत्वाद्भु
॥१२९॥ वोवुकोनित्यत्वात्ताभ्यां लिटःकित्त्वेनानर्थक्यमिति ॥ ॥इतिप्रथमोध्यायः ॥ ॥तृतीयाचहोश्छंदसि ॥ जुहोतेःकर्मणितृती
यास्याद्द्वितीयाच ॥ यवाग्वाग्निहोत्रंजुहोति ॥ अग्निहोत्रशब्दोत्रहविषिवर्त्तते ॥ यस्याग्निहोत्रमधिश्रितममेध्यमापद्येतेत्या
दिप्रयोगदर्शनात् ॥ अग्नयेहूयतइतिव्युत्पत्तेश्च ॥ यवाग्वाख्यंहविर्देवतोद्देशेनत्यक्त्वाप्रक्षिपतीत्यर्थः ॥ द्वितीयाब्राह्मणे ॥ ब्रा
ह्मणविषयेप्रयोगे दिवस्तदर्थस्य कर्मणिद्वितीयास्यात् षष्ठ्याअपवादः ॥ गामस्यतदहःसभायांदीव्येयुः ॥ चतुर्थ्यर्थेबहुलं
छंदसि षष्ठीस्यात् ॥ पुरुषमृगश्चंद्रमसेगोधाकालकादार्वाघाटस्तेवनस्पतीनां ॥ वनस्पतिभ्यइत्यर्थः ॥ षष्ठ्यर्थेचतुर्थीतिवाच्य
च्यं ॥ याखर्वेणपिबतितस्यैखर्वः ॥ यजेश्चकरणे ॥ इहबहुलंषष्ठी ॥ घृतस्यघृतेनवायजते ॥ बहुलंछंदसि ॥ अदोघस् ॥१२९॥
लादेशःस्यात् ॥ घस्तान्नूनं ॥ लुङि • मंत्रेघसेतिच्लेर्लुक् ॥ अडभावः ॥ सग्धिश्चमे ॥ हेमंतशिशिरावहोरात्रेचछंदसि ॥ द्वंद्वःपू
र्ववल्लिंगः ॥ हेमंतश्चशिशिरंचहेमंतशिशिरौ ॥ अहोरात्रे ॥ ॥अदिप्रभृतिभ्यःशपः ॥ बहुलंछंदसि ॥ वृत्रंहनतिवृत्रहा ॥ अहि

शायतउपदक् ॥ अत्रलुङ् ॥ अदादिभिन्नेभ्योपिक्वचिल्लुक् ॥ त्राध्वन्नोदेवाः ॥ जुहोत्यादिभ्यःश्लुः ॥ बहुलंछंदसि ॥ दातिप्रियाणिचिद्वसु
अन्यत्रापि ॥ पूर्णांविवष्टि ॥ मंत्रेघसह्वरणशवृदहाद्वृच्कृगमिजनिभ्योलेः ॥ एभ्योलेर्लुक्स्यान्मंत्रे ॥ अक्षन्नमीमदंतहि ॥ घ
स्लादेशस्यगमहनेत्युपधालोपः घासिवसीतिषः ॥ माह्वर्मित्रस्य ॥ धूर्तिःप्रणङ्मर्त्यस्य ॥ नशेर्वेतिकुत्वं ॥ सुरुचोवेनआवः
मानआधक् ॥ आदित्यागकारांतग्रहणं ॥ आप्राद्यावापृथिवी ॥ परावर्ग्भारभृद्यथा ॥ अक्रन्नुषासः ॥ त्वेरयिंजागृवांसोअ
नुग्मन् ॥ मंत्रग्रहणंब्राह्मणस्याप्युपलक्षणं ॥ अत्नवावस्यहंता ॥ विभाषाअनुदात्तेनेहे ॥ नताअगृभ्रंजनिहविषः ॥ इ
तिद्वितीयोध्यायः ॥ ॥अभ्युत्सादयांप्रजनयांचिकयांरमयामकःपावयांक्रियाद्विदामक्रन्नितिछंदसि ॥ आद्येषुचतुर्षुलुङि
आम्रअकः इत्यनुप्रयोगश्च ॥ अभ्युत्सादयामकः ॥ अभ्युदसीषददितिलोके ॥ प्रजनयामकः ॥ प्राजीजनदित्यर्थः ॥ चिकयाम
कः ॥ अचैषीदित्यर्थे चिनोतेरामद्विर्वचनंकुत्वंच ॥ रमयामकः ॥ अरीरमत् ॥ पावयांक्रियात् ॥ पाव्यादितिलोके ॥ विदामक्रन् ॥ अवे
दिषुः ॥ गुपेश्छंदसि ॥ च्लेश्चङ् ॥ गृहानजूगुपतंयुवं ॥ अगोप्तमित्यर्थः ॥ नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः ॥ च्लेश्चङ्न
मात्वायतोजरितुःकाममूनयीः ॥ मात्वाग्निर्ध्वनयीत् ॥ कृमृदृरुहिभ्यश्छंदसि ॥ च्लेरङ्वा ॥ इदंतेभ्योकरंनमः ॥ अमरन्

॥वैदिकी॥ अदुहत्॥ यत्सानोः सानुमारुहत्॥ छंदसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रति पृ०प्र०
॥सि०कौ०॥ षीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि॥ कृंततेर्निस्पूर्वात्क्यपि आद्यंतयोर्विपर्यासः॥ निसः षत्वं च॥ नि
॥१३१॥ ष्टर्क्यं चिन्वीत पशुकामः॥ देवशब्दे उपपदे ह्वयतेर्जुहोतेर्वा क्यप् दीर्घश्च॥ स्पर्द्धंते वा उ देवहूय॥ अडत्॥ आभ्यां नयतेः क्यप्॥ प्र
णीयः॥ उन्नीयः॥ उत्पूर्वाच्छिषेः क्यप्॥ उच्छिष्यः॥ मृङ्स्तॄध्वृ एभ्यो यत्॥ मर्यः॥ स्तर्या॥ स्त्रियामेवायं॥ ध्वर्यः॥ खनेर्यत्ण्य
तौ॥ खन्यः खान्यः॥ यजेर्यः॥ शुंधध्वं दैव्याय कर्मणे देवयज्यायै॥ आङ्पूर्वात्पृच्छेः क्यप्॥ आपृच्छ्यं धरुणं वाज्यर्षति॥ सी
व्यतेः क्यप् षत्वं च॥ प्रतिषीव्यः॥ ब्रह्मणि वदेर्ण्यत्॥ ब्रह्मवाद्यं॥ लोके तु वदः सुपि क्यप् चेति क्यप्यतौ॥ भवतेः स्तौतेश्च ण्यत्॥ भा
व्यः॥ स्ताव्यः॥ उपपूर्वाच्चिनोतेर्ण्यत्॥ आयादेशः पृडे उत्तरपदे उपचाय्यपृडं॥ हिरण्यमिति वक्तव्यं॥ उपचेयपृडमेवान्यत्
मृडः सुखने पृडश्चेत्यस्मादिगुपधलक्षणः कः॥ छंदसि वनसनरक्षिमथां॥ एभ्यः कर्मण्युपपदे इन् स्यात्॥ ब्रह्मवनिं त्वा क्षत्रव ॥१३१॥
निं॥ उत नो गोषणिं धियं॥ ये पथां पथिरक्षयः॥ चतुरक्षौ पथिरक्षी॥ हविर्मथीनामभि॥ छंदसि सहः॥ ण्विः स्यात्॥ पृतनाषाट्॥ व
हश्च॥ प्राग्वत्॥ दित्यवाट्॥ योगविभाग उत्तरार्थः॥ कव्यपुरीषपुरीष्येषु ञ्युट्॥ एषु वहेर्ञ्युट् स्यात् छंदसि॥ कव्यवाहनः॥ पुरीष

वाहनः॥ पुरीष्यवाहनः॥ हव्येऽनंतःपादं॥ अग्निर्नो हव्यवाहनः॥ अग्निश्च हव्यवाहनः॥ पादमध्ये तु वहश्चेति ण्विरेव॥ हव्यवाळ
ग्निरजरः पिता नः॥ जनसनखनक्रमगमो विट्॥ विड्वनोरिस्यात्वं॥ अब्जा गोजाः॥ गोषा इंदो नृषा असि॥ स्यनोतेरनः॥ तिपूर्व
द्यं शुष्मेभिर्विसखा इवाकृजत्॥ आ दधिक्राः शवसा पंचकृष्टीः॥ अवे यजः॥ मंत्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्॥ श्वे
तवहादीनां डस् स्यात् पदस्य चेति वक्तव्यं॥ अवपदत्वं भावितं ण्विनोपवाहोडस्य च वक्तव्य इत्यर्थः॥ श्वेतवाः॥ श्वेतवाहौ॥ श्वेतवा
हः॥ उक्थानि उक्थैर्वा शंसति॥ उक्थशाः यजमानः॥ उक्थशासौ॥ उक्थशासः॥ पुरो दाश्यते दीयते पुरोडाः॥ अवे यजः॥
अवयाः॥ अवयाजौ॥ अवयाजः॥ अवयाः श्वेतवाः पुरोडाश्च॥ एते संबुद्धौ कृतदीर्घा निपात्यंते॥ हे उक्थशाः॥ विजुपे छंद
सि॥ उपे उपपदे यजेर्विच्॥ उपयट्॥ आतो मनिन्क्वनिब्वनिपश्च॥ सुप्युपसर्गे चोपपदे आदंतेभ्यो धातुभ्यश्छंदसि विषये
मनिनादयस्त्रयः प्रत्ययाः स्युः॥ चाद्विच्॥ सुदामा॥ सुधीवा॥ सुपीवा॥ भूरिदावा॥ घृतपावा॥ विच् कीलालपाः॥ बहुलं छंद
सि॥ उपपदांतरेपि हंतेर्बहुलं क्विप् स्यात्॥ यो मातृहा॥ पितृहा॥ छंदसि लिट्॥ भूतसामान्ये॥ अहं द्यावापृथिवी आततान
लिटः कानज्वा॥ क्वसुश्च॥ छंदसि लिटः कानच्क्वसू वा स्तः॥ चक्राणा वृष्णि॥ यो नो अग्ने अररिवाँ अघायुः॥ छंदसि परे

॥वै॰ प्री॥ च्छायामपि क्वचित्क्त्वा: ॥ क्या छंदसि ॥ उ प्रत्ययः स्यात् ॥ अघायुः ॥ एरजधिकारे जवसवौ छंदसि वाच्यौ ॥ देवस्य सवितुः सवे ॥ उर्वोक्तमे तव:

॥सि॰कौ॰॥ मंत्रे वृषेषपचमनविदभूवीरा उदात्तः ॥ वृषादिभ्यः क्तिन्स्यात्स चोदात्तः ॥ वृष्टिं दिवः ॥ सुम्नमिष्टये ॥ पचात्पक्तीरुत ॥ इयं ते नव्यसी वर्दि॰हि॰

मतिः ॥ वित्तिः भूतिः ॥ अग्न आयाहि वीतये ॥ रातौ स्यामोभयासः ॥ छंदसि लुङ्‌लङ्‌लिटः ॥ धात्वर्थानां संबंधे सर्वकालेष्वेते वा स्युः

॥१३१॥ देवो देवेभिरागमत् ॥ लोडर्थे लुङ् ॥ इदं तेभ्योऽकरं नमः ॥ लङ् ॥ अग्निमद्य होतारमवृणीतायं यजमानः ॥ लिट् ॥ अद्या ममार ॥

दृश्यर्थ: अद्य म्रियते ॥ लिङर्थे लेट् ॥ विध्यादौ हेतुमद्भावादौ च धातोर्लेट् स्याच्छंदसि ॥ सिब्बहुलं लेटि ॥ धातोः ॥ इतश्च लोपः परस्मैप

देषु ॥ लेटस्तिङामितो लोपो वा स्यात्परस्मैपदेषु ॥ लेटोडाटौ ॥ लेटोऽडाटौ ॥ एतावागमौ स्तः सौ च पितौ ॥ सिब्बहुलं णिद्वक्त

व्यः ॥ वृद्धिः ॥ प्रण आयूंषि तारिषत् ॥ सुपेशसस्करति जोषिषद्धि ॥ आ साविषदर्शसानाय ॥ सिपो लोपस्य वाऽभावे ॥ पताति

दिद्युत् ॥ प्रियः सूर्ये प्रियो अग्ना भवाति ॥ स उत्तमस्य ॥ लेट उत्तमस्य सकारस्य वा लोपः स्यात् ॥ करवाव ॥ करवाव ॥ टेरेत्वं ॥ आत ॥१३१॥

ऐ ॥ लेट आकारस्य ऐ स्यात् ॥ सुतेभिः सुप्रयसा मादयैते ॥ आता मित्याकारस्य ऐकारः ॥ विधिसामर्थ्यादादटः एत्वं न ॥ अन्यथा

हि एटमेव विदध्यात् ॥ यो यजाति यजात इत् ॥ वैतोऽन्यत्र ॥ लेट एकारस्य ऐ स्यात् ॥ आत ऐ इत्यस्य विषयं विना ॥ पशूनामीशे

ति ग्रहा गृह्यंते ॥ अन्यत्र किं ॥ सुप्रयसा मादयैते ॥ उपसंवादाशंकयोश्च ॥ पणबंधे आशंकायां च लेट् स्यात् ॥ अहमेव पशूनामीशे ॥ ने

ज्जिह्मायंत्यो नरकं पताम ॥ हलःश्नःशानज्झौ ॥ छंदसि शायजपि ॥ अपिशब्दाद्धानचू ॥ तृयहा न्भेश्छंदसीति भेः ॥ गृभाय जिह्वयाम

धु ॥ बधान देव सवितः ॥ अनिदितामिति बध्नातेर्नलोपः ॥ गृभ्णामि ते ॥ मध्वा जभार ॥ व्यत्ययो बहुलं ॥ विकरणानां बहुलं व्य

त्ययः स्याच्छंदसि ॥ आण्डा शुष्णस्य भेदति ॥ भिनत्तीति प्राप्ते ॥ जरसा मरते पतिः ॥ म्रियत इति प्राप्ते ॥ इंद्रो वस्तेन नेषतु ॥ न

यतेर्लोट् ॥ शप् सिपौ द्वौ विकरणौ ॥ इंद्रेण युजा तरुषेम वृत्रं ॥ तरेमेत्यर्थः ॥ तरतेर्विध्यादौ लिङ् ॥ उः सिप् शप् चेति त्रयो वि

करणाः ॥ सुप्तिङुपग्रहलिंगनराणां कालहलच्स्वरकर्तृयङां च ॥ व्यत्ययमिच्छति शास्त्रकृदेषां सोपि च सिध्यति बाहुल

केन ॥ धुरि दक्षिणायाः ॥ दक्षिणस्यामिति प्राप्ते ॥ चषालं ये अश्वयूपाय तक्षति ॥ तक्षंतीति प्राप्ते ॥ उपग्रहः परस्मैपदात्म

नेपदे ॥ ब्रह्मचारिणमिच्छते ॥ इच्छतीति प्राप्ते ॥ प्रतीपमन्य ऊर्मिर्युध्यति ॥ युध्यत इति प्राप्ते ॥ मधोस्तृप्ता इवासते ॥ मधुन इति प्रा

ति ॥ नरः पुरुषः ॥ अधा स वीरैर्दशभिर्वियूयाः ॥ वियूयादिति प्राप्ते ॥ कालवाचिप्रत्ययः ॥ श्वोऽग्नीनाधास्यमानेन ॥ लुटो

विषये लृट् ॥ तमसो गा अदुक्षत् ॥ अधुक्षदिति प्राप्ते ॥ मित्रं वयं च सूरयः ॥ मित्रा वयमिति प्राप्ते ॥ स्वरव्यत्ययस्तु वक्ष्यते

॥वै॰ प्री॥ कर्तृशब्दः कारकमात्रपरः॥ तथा च तद्वाचिनां कृत्तद्धितानां व्यत्ययः॥ अन्नादाय॥ आण्विषयेऽध्वन्॥ अचयद्विशेषः॥ यङो
॥सि॰ कौ॰॥ यशब्दादारभ्य लिङ्याशिष्यङि॰ लिङ॰ कारेण प्रत्याहारः॥ तेषां व्यत्ययो भेदतीत्यादि रूक्क एव॥ ॥लिङ्याशिष्यङ॥ आशी
॥१३२॥ र्लिङि परे धातोरङ् स्याच्छंदसि॥ वरतम्॥ मंत्रं वोचेमाग्नये॥ दृशेरग्वक्तव्यः॥ पितरंच दृशेयं मातरंच॥ अं [illegible] ङितु
दृशोऽङीति गुणः स्यात्॥ छंदस्युभयथा॥ धात्वधिकारोक्तः प्रत्ययः सार्वधातुकार्धधातुकोभयसंज्ञः स्यात्॥ वर्द्धं तु त्वा
सुष्टुतयः॥ वर्द्धयं त्वित्यर्थः॥ आर्द्धधातुकत्वाण्णिलोपः॥ विश्टण्विरे॥ सार्वधातुकत्वाच्छ्नुः श्नाभावश्च॥ हुश्नुवोरिति यण्॥
॥आहगमहनजनः किकिनौ लिट्च॥ आदंताहवर्णांताद्गमादेश्च किकिनौ स्तः तौ च लिड्वत्॥ बभ्रिर्वज्रं पपिः सोमं ददिर्गाः॥
जग्मिर्युवा॥ जघ्निर्वृत्रममित्रियं॥ जज्ञिः॥ लिड्वद्भावादेव सिद्धे उत्सर्गस्मृतामिति गुणबाधनार्थं कित्वं बहुलं छंदसीति कत्वे ॥१३२॥
ततुरिः॥ जगुरिः॥ तुमर्थे से सेन से असेन्क्से कसेन ध्यै अध्यैन्कध्यै कध्यैन् शध्यै शध्यैन् तवै तवेङ् तवेनः॥ से॥ वक्षे रा
यः॥ सेन॥ तावामेषे॥ असे॥ असेन्॥ शरदो जीवसे धाः॥ असेन्नित्वादाद्युदात्तः॥ क्से॥ प्रेषे॥ कसेन्॥ गवामिव श्रियसे

अध्यै॥ अध्यैन्॥ जठरंपृणध्यै॥ पक्षे आद्युदात्तं॥ कध्यै॥ कध्यैन्॥ आहुवध्यै॥ पक्षे नित्स्वरः॥ शध्यै॥ राधसः सह मादयध्यै
शध्यैन्॥ वायवे पिबध्यै॥ तवै॥ दातवा उ॥ तवेङ्॥ सूतवे॥ तवेन्॥ कर्त्तवै॥ प्रयै रोहिष्यै अव्यथिष्यै॥ एते तुमर्थे निपात्यंते॥ प्रयातुं
दृं रोढुं अव्यथितुमित्यर्थः॥ दृशे विख्ये च॥ द्रष्टुं विख्यातुमित्यर्थः॥ शकि णमुल्कमुलौ॥ शक्नोतावुपपदे तुमर्थे एतौ स्तः॥ विभाजं नाश
कत॥ अपलुपं नाशकत्॥ विभक्तुमुपलोप्तुमित्यर्थः॥ ईश्वरे तोसुन्कसुनौ॥ ईश्वरो विचरितोः॥ ईश्वरो विलिखः॥ विचरितुं विलि चरितोः
खितुमित्यर्थः॥ कृत्यार्थे तवैकेन्केन्यत्वनः॥ नम्लेच्छितवै॥ अवगाहे॥ दिदृक्षेण्यः॥ भूर्यस्पष्टकर्त्वं॥ अवचक्षे च॥ रिपुणा नावचक्षे॥ अ
वख्यातव्यमित्यर्थः॥ भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्॥ आसंस्थातोः सीदंति॥ आसमाप्तेः सीदंतीत्यर्थः॥ उदेतोः
प्रचरितोः अपकर्त्तोः॥ प्रवदितोः॥ [illegible]तोः॥ आतमितोः॥ काममाजनितोः संभवाम्॥ सृपितृदोः कसुन्॥ भावलक्षणे इत्येव॥ पुरा क्रूरस्य विसृ
पो विरप्शिन्॥ पुरा [illegible] तृपः आतृदः॥ ॥इति तृतीयोऽध्यायः॥ ॥रात्रेश्चाजसौ॥ रात्रिशब्दान्ङीप् स्यादजस्विषये छंदसि॥ रात्री व्य
ख्यदायती॥ लोके तु कृदिकारादिति ङीषंतोदात्तः॥ नित्यं छंदसि॥ ब[illegible]दिभ्यश्छंदसि विषये नित्यं ङीष्॥ बह्वीषु हित्वा॥ नित्य कृ॰ २
ग्रहणमुत्तरार्थं॥ भुवश्च॥ ङीप् स्याच्छंदसि॥ विभ्वी प्रभ्वी॥ विप्रसंभ्य इति डुप्रत्ययांतस्य सूत्रेनुक्रियते॥ उतेत्यनुवर्त्तनेन उव[illegible]
स्य स्यात्

॥वै०कौ०॥ ङ्यादेशः सौत्रः॥ मुद्गलाच्छंदसि लिच्च॥ ङीषो लित्वमानुक्चागमः॥ लित्स्वरः॥ रथीरभून्मुद्गलानी॥ दीर्घजिह्वी च च्छंदसि॥ सं वै०कौ०अ०
॥सि०उ०॥ योगोपधत्वादप्राप्तो ङीष्विधीयते॥ आसुरो वै दीर्घजिह्वी देवानां यज्ञवाट्॥ कद्रुकमंडल्वोश्छंदसि॥ ऊङ् स्यात्॥ कद्रूश्च वै
मंडलूः॥ गुग्गुलुमधुजतुपतयालूनामिति वक्तव्यं॥ गुग्गुलूः॥ मधूः॥ जतूः॥ पतयालूः॥ अव्ययात्त्यप्॥ आविष्ट्योप
॥१२२॥ संख्यानं छंदसि॥ आविष्ट्यो वर्धते॥ छंदसि ठञ्॥ वर्षाभ्यष्ठक्॥ ठकोपवादः॥ स्वरे भेदः॥ वार्षिकं॥ वसंताच्च॥ ठञ् स्यात् छंद
सि॥ वासंतिकं॥ हेमंताच्च॥ ठञ् स्यात्॥ हैमंतिकं॥ योगविभाग उत्तरार्थः॥ शौनकादिभ्यश्छंदसि॥ णिनिः प्रोक्ते॥ छाणोरप
वादः॥ शौनकेन प्रोक्तमधीते शौनकिनः॥ वाजसनेयिनः॥ छंदसि किं॥ शौनकीया शिक्षा॥ द्व्यचश्छंदसि॥ विकारे मयट्
स्यात्॥ शरमयं बर्हिः॥ यस्य पर्णमयी जुहूः॥ नोत्वद्वर्ध्रबिल्वात्॥ उत्वान् उकारवान्॥ मौंजं शिक्यं॥ वर्ध्रं चर्म तस्य विकारो ॥१२२॥
वार्ध्री रज्जुः॥ सभाया यः॥ ढश्छंदसि॥ सभेयो युवा॥ भवे छंदसि॥ सप्तम्यंताद्भवार्थे यत्॥ मेघ्याय च विद्युत्याय च॥ य
थायथं शैषिकाणामणादीनां घादीनां चापवादो यत्॥ पक्षे तेपि भवंति॥ सर्वविधीनां छंदसि वैकल्पिकत्वात्॥ तद्य

था॥ मूजवान्नाम पर्वतः॥ तत्र भवो मौजवतः॥ सोमस्येव मौजवतस्य भक्षः॥ आ चतुर्थसमासेश्छंदोधिकारः॥ पाथोनदीभ्यां
ड्यण्॥ तमु त्वा पाथ्यो वृषा॥ चनोदधीत नाद्यो गिरो मे॥ वेशंतहिमवद्भ्यामण्॥ वैशंतीभ्यः स्वाहा॥ हैमवतीभ्यः स्वाहा॥ स्रोतसो
विभाषा ड्यड्ड्यौ॥ पक्षे यत्॥ ड्यत् ड्य योः स्वरे भेदः॥ स्रोतसि भवः॥ स्रोत्यः॥ स्रोतस्यः॥ सगर्भसयूथसनुताद्यत्॥ अनुभ्राता
सगर्भ्यः॥ अनुसखा सयूथ्यः॥ यो नः सनुत्य उत वा जिघत्नुः॥ नुतिर्नुतं॥ नपुंसके भावे क्तः॥ सगर्भादिषु त्रयोपि कर्मधारयाः॥
समानस्य छंदसीति सः॥ ततो भवार्थे यत्॥ यतोपवादः॥ तुग्र्याद्घन्॥ पक्षे यदपि॥ आवः शर्म वृषभं तुग्र्यास्विति वचनात्॥ तु
शद्व०५ ग्रियाक्षितिशाखांतरे॥ धनाकाशयज्ञवरिष्ठेषु तुग्र इति वृत्तिः॥ अग्राद्यत्॥ घच्छौ च॥ चाद्घन्॥ अग्रे भवोऽग्र्यः॥ अग्रियः॥ स
मुद्राभ्राद्घः॥ समुद्रिया अप्सरसो मनीषिणं॥ नानदतो अभ्रियस्येव घोषाः॥ बर्हिषि दत्तं॥ प्रागिघतादित्येव॥ बर्हिष्येषु इत्यस्य
भागकर्मणी॥ भागोंऽशः॥ दूत्यं॥ रक्षोयातूनां हननी॥ या ते अग्ने रक्षस्या तनूः॥ रेवतीजगतीहविष्याभ्यः प्रशस्ये॥ प्रशंसने यत्स्यात्॥
रेवत्यादीनां प्रशंसने॥ रेवत्यं॥ जगत्यं॥ हविष्यं॥ असुरस्य स्वं॥ असुर्यं देवेभिर्धायि विश्वं॥ मायायामण्॥ असुरस्य आसुरी मा
या॥ तद्वानासामुपधानो मंत्र इतीष्टकासु लुक् च मतोः॥ वर्चस्वानुपधानो मंत्र आसामिष्टकानां वर्चस्याः॥ सतव्याः॥ अश्विमा

॥वै॰की॰॥ नण॥ आश्विनीरुपदधाति॥ वयस्यासुमूर्द्धोमतुप्॥ तद्वानासामिति सूत्रं सर्वमनुवर्त्तते॥ मतोरितिपदमावर्त्य पंचम्यंतं बोध्यं॥ म वै॰ द॰ अ॰
॥सि॰७॰॥ तुवंतोयो मूर्धशब्दस्ततोमतुप्स्यात्प्रथमस्य मतोर्लुक् च वयःशब्दवन्मंत्रोपधेयास्त॥ यस्मिन्मंत्रे मूर्धवयःशब्दोस्ति स्तुनोपधेयास्त॥
॥१३४॥ मूर्द्धन्वतीरुपधातीति प्रयोगः॥ मत्वर्थेमासतन्वोः॥ नभोम्भंतदस्मिन्नस्तीति नभस्यामासः॥ ओजस्यातनूः॥ मधोर्ञ्च मधव्यः
माधवः॥ ओजसोहनियत्खौ॥ ओजस्यमहः॥ ओजसीनंवा॥ वेशोयशआदेर्भगाद्यल्खौ॥ यथासंख्यंनेष्यते॥ वेशोबलंतदेवभगइ
तिकर्मधारयः॥ वेशोभग्यः॥ वेशोभगीनः॥ यशोभग्यः॥ यशोभगीनः॥ पूर्वैःकृतमिनयौच॥ गंभीरेभिःपथिभिःपूर्विणेभिः
यतेपथाःसवितःपूर्व्यासः॥ अद्भिःसंस्कृतं॥ यस्येदमप्यंहविः॥ सहस्रेणसंमितौघः॥ सहस्रियासोअपांनोर्मयः॥ सह
स्रेणतुल्याइत्यर्थः॥ मतौच॥ सहस्रशब्दान्मत्वर्थेघः स्यात्॥ सहस्रमस्यास्तीति सहस्रियः॥ सोममर्हतियः॥ सोम्योब्रा ॥१३४॥
मत्वर्थे ३ ह्मणः॥ यज्ञार्हइत्यर्थः॥ मयेच॥ सोमशब्दाद्यःस्यान्मयडर्थे॥ सोम्यंमधु॥ सोममयमित्यर्थः॥ मधोः॥ मधुशब्दान्मयडर्थेयत् मत्वर्थे २
स्यात्॥ मधव्यः॥ मधुमयइत्यर्थः॥ वसोःसमूहेच॥ चान्मयडर्थेयत्॥ वसव्यः॥ अक्षरसमूहेछंदसउपसंख्यानं॥ छंदः
शब्दादक्षरसमूहेवर्त्तमानात्स्वार्थेयदित्यर्थः॥ ओश्रावयेति चतुरक्षरं॥ अस्तुश्रौषडितिचतुरक्षरं॥ यजामहइतिपं

चाक्षरं॥ यजेतिद्व्यक्षरं॥ द्व्यक्षरोवषट्कारः॥ एषवैसप्तदशाक्षरश्छंदस्यः॥ नक्षत्राद्घः॥ स्वार्थे॥ नक्षत्रियेभ्यःस्वाहा॥ सर्वदेवात्तातिल्
स्वार्थे॥ सवितानःसुवतुसर्वतातिं॥ प्रदक्षिणिद्देवतातिमुराणः॥ शिवशमरिष्टस्यकरे॥ करोतीतिकरः॥ पचाद्यच्॥ शिवंकरोतीति
शिवतातिः॥ याभिःशंतातीभवथोददाशुषे॥ अथोअरिष्टतातये॥ भावेच॥ शिवादिभ्योभावेतातिल्स्याच्छंदसि॥ शिवस्यभा
वःशिवतातिः॥ शंतातिः॥ अरिष्टताति॥ इतिचतुर्थोध्यायः॥ सप्तनोञ्छंदसि॥ तदस्यपरिमाणमितिवर्गइतिच॥ सप्तस
प्तानि॥ असृजत॥ शन्शतोर्डिनिश्छंदसि॥ तदस्यपरिमाणमित्यर्थेवाच्यः॥ पंचदशिनोअर्द्धमासाः॥ त्रिंशिनोमासाः॥ विंश
तेश्चेतिवाच्यं॥ विंशिनोंगिरसः॥ युष्मदस्मदोःसादृश्येवतुब्वाच्यः॥ त्वावतःपुरुवसो॥ नत्वावांअन्यः॥ यज्ञोविप्रस्यमावतः॥
छंदसिच॥ प्रातिपदिकमात्रान्तदर्हतीतियत्॥ सादन्यंविदथ्यं॥ वत्सरांताच्छश्छंदसि॥ निर्वृत्तादिष्वर्थेषु॥ इद्वत्सरीयः॥ संपरि
पूर्वात्खच॥ चाच्छः॥ संवत्सरीणः॥ संवत्सरीयः॥ परिवत्सरीणः॥ परिवत्सरीयः॥ छंदसिघस्॥ ऋतुशब्दात्तदस्यप्राप्तमित्यर्थे
भागश्चर्त्वियः॥ उपसर्गाच्छंदसिधात्वर्थे॥ धात्वर्थविशिष्टसाधनेवर्त्तमानात्स्वार्थेवतिःस्यात्॥ यदुद्वतोनिवतः॥ उद्गतान्नि
गतानित्यर्थः॥ थट्चछंदसि॥ नांतादसंख्यादेःपरस्यडटःथट्स्यान्मडुक्॥ पंचथं॥ पंचमं॥ छंदसिपरिपंथिपरिपरिणौपर्यव

॥वैदिकी॥ त्वातरि॥ अपत्यंपरिपंथिनं॥ मात्वापरिपरिणोविदन्॥ बहुलंछंदसि॥ मत्वर्थेविनिः स्यात्॥ अष्ट्रामेखलाद्वयोभयरुजा हृदयानांदी वै० पं० अ०
॥सि०कौ०॥ र्घश्चेतिवक्तव्यं॥ मंहिष्ठमुभयाविनं॥ शुनृमष्ट्राव्यचरत॥ छंदसीवनिपौवक्तव्यौ॥ रथीरभूत्॥ सुमंगलीरियंवधूः॥ मघवानमी
॥१२५॥ महे॥ तयोर्दार्हिलौचछंदसि॥ इदंतदोर्यथासंख्यंस्तः॥ इदाहिवउपस्तुतिं॥ तर्हि॥ थाहेतौचछंदसि॥ अवरस्यास्तात्यर्थेनिपा
तौ॥ पश्चादिसः॥ नोतपश्च तुश्छंदसि॥ त्वजेतात्तन्नेताह्नइष्टनीयसुनोस्तः॥ आसुतिंकरिष्ठः॥ दोहीयसीधेनुः॥ प्रत्नपूर्वविश्व
श्वेमात्थाल्छंदसि॥ इवार्थे तंप्रत्नथापूर्वथाविश्वथेमथा॥ अमुचछंदसि॥ किमेत्तिङव्ययघादिव॥ प्रतन्नयप्रतरं॥ ह
कज्येष्ठाभ्यांतिल्तातिलौचछंदसि॥ स्वार्थे॥ योनोदुरेवोहरुकृतिः॥ ज्येष्ठतातिंबर्हिषदं॥ अनसंतान्नपुंसकाच्छंदसि॥ त
त्पुरुषाहृत्स्यात्समासांतः॥ ब्रह्मसामंभवति॥ देवछंदसानि॥ बहुप्रजाछंदसि॥ बहुप्रजानिर्ऋतिमाविवेश॥ छंदसिच॥
तो दंतस्यदत्स्याद्बहुव्रीहौ॥ उभयोदतःप्रतिगृह्णाति॥ स्वतश्छंदसि॥ स्वदंतादद्बहुव्रीहेर्नकुत्र॥ इतामातायस्यसहतमाता॥ ॥१२५॥
॥इतिपंचमः॥ एकाचोहिछंदसिवेतिवक्तव्यं॥ योजागारा[illegible]॥ दातिप्रियाणि॥ तुजादीनांदीर्घोभ्यासस्य॥ तुजादिराकृ
तिगणः॥ प्रभरातुजानः॥ स्वर्यमामहानं॥ दाधारयःपृथिवीं॥ सतूताव॥ बहुलंछंदसि॥ इः संप्रसारणंस्यात्॥ इंद्रमाहु

॥किमस्यास्याद्बुतौप्रकोरव॥ कथाग्रामं॥ नपछंदसि॥ कथाघशोम॥ पथ्यपथ्यावछंदसि॥

॥लिघुसिरूपं॥ बहुग्रहणानुवृत्तेर्नेह॥ अग्निंज्योतिर्निचाय्य॥२ ये॰

वर्ततये॥ नविंत्रे उत्तरपदादिलोपश्छंदसि॥ अकशब्देपरेत्रेःसंप्रसारणंउत्तरपदादेर्लोपश्चेतिवक्तव्यं॥ तवंसहतौ स्यानि॥ रवोमेतो छंदसिकं
बहुलं॥ रेवान्॥ रयिमान्पुष्टिवर्धनः॥ वायःकी॥ न्यश्नंयंविक्रुर्नविनिविक्रुर्नविनिविक्रुरन्यं॥ अपस्पृधेथामानृचुरानृहुश्चि्युषेति
त्याजश्राताश्रितमाशीराशीर्त्तः॥ एतेछंदसिनिपात्यंते॥ इंद्रश्चविष्णोयदपस्पृधेथां॥ स्पर्धेर्लङ्आथां॥ अर्कमानृचुः॥ वसून्यानृ
हुः॥ अर्चेरर्हेश्चलिट्युसि॥ निस्युषे च्युङोलिटिथासि॥ यस्तित्याज॥ त्यजेर्णलि॥ श्रातास्तइन्द्रसोमाः॥ श्रितानोग्रहाः॥ श्रीञ्
पाके॥ निष्ठायां॥ नाशिरंदुह्रे॥ मध्यतआशीर्त्तः॥ श्रीञ्एवक्किपिनिष्ठायांच॥ खिदेःछंदसि॥ खिदेर्देन्योअस्यैचआस्यात्॥ वि
खाद॥ निखेदेत्यर्थः॥ शीर्षश्छंदसि॥ शिरःशब्दस्य शीर्षन्स्यात्॥ शीर्ष्णः शीर्ष्णोजगतः॥ वाछंदसि॥ दीर्घाज्जसिइचिच पूर्वसवर्ण
दीर्घोवास्यात्॥ वाराही॥ वाराह्यौ॥ मानुषीरीळते विशः॥ उत्तरस्त्रद्वयेपीदंवाक्यभेदेनसंबध्यते तेनामिपूर्वत्वंवास्यात्॥ शमीव
शम्यं॥ स्वर्यंसुषिरामिव॥ संप्रसारणाच्चेति पूर्वरूपमपिवा॥ इज्यमानः॥ यज्यमानः॥ शेःश्छंदसिबहुलं॥ लोपःस्यात्॥ यातेः
गात्राणां॥ तातापिंडानां॥ एमन्नादिषुछंदसिपररूपंवक्तव्य॥ अपांत्वेमन्॥ अपांत्वोद्मन्॥ भव्यप्रवय्येचछंदसि॥ बिभेतेस्तस्मा
दितिभव्यः॥ वेतेःप्रवय्या इतिस्त्रियामेवनिपातनं॥ प्रवेयमन्यत्र॥ छंदसिकिं॥ भेयं प्रवेयं॥ इंदय्याअपकुपसंख्यानं॥ इन्दभवा

॥वैदिकं॥ ह्रदय्या आप॥ भवेच्छंदसी नियतं॥ प्रकृत्यांतःपादमव्यपरे॥ सकृपादमध्यस्थ एङ् प्रकृत्या स्याददतिपरे न तु वकारयकारपरेति॥ उ वै०प्र०अ०
॥सि०उ०॥ पप्रयंतो अध्वरं॥ सुजाते अश्वसूनृते॥ अंतःपादं किं॥ एतास एतेर्चेति॥ अव्यपरे किं॥ तेवदन्॥ अव्यादवद्यादवक्रमुरव्रताय
मवंत्वव स्युषु॥ एषुव्यपरेष्वपि एङ् प्रकृत्या॥ वसुभिर्नो अव्यात्॥ मित्रमहो अवद्यात्॥ मांशिवासो अवक्रमुः॥ तेनो अव्रता
॥१२६॥ शतधारो अयं मणिः॥ तेनो अवंतु॥ ॥कुशिकासो अवस्यवः॥ यद्यपि बहुचे स्तेनो वंतु रथंतरं॥ सोयमागात्॥ तरुणेभिरित्यादे
प्रकृतिभावो न क्रियते तथापि बाहुलकात् समाधेयं॥ प्रातिशाख्ये तु वाचनिकमेवायमर्थः॥ यजुष्युरः॥ उरःशब्दं एङंतो ऽतिप्रकृत्या
यजुषि॥ उरो अंतरिक्षं॥ यजुषि पादाभावादनंतःपादार्थं वचनं॥ आपो जुषाणो वृष्णोवर्षिष्ठे अंबेऽबालेऽबिके पूर्वे॥ यजुषि अतिप्रकृत्या
आपो अस्मान्मातरः॥ जुषाणो अग्निराज्यस्य॥ वृष्णो अंशुभ्यां॥ वर्षिष्ठे अधिनाके॥ अंबे अंबाले अंबिके॥ अस्मादेव वचनाद्वा
थेतिहस्वो न॥ अंगइत्यादौ च॥ अंगशब्दे परे एङ् तदादौ च अकारे परे य एङ् पूर्वः सोतिप्रकृत्या यजुषि॥ अयं सो अग्निः॥ अयं ॥१२६॥
गे० सो अध्वरः॥ अनुदात्ते किं॥ अथायमुदेद॥ अयशब्द ओकारोदात्तः॥ कुधपरे किं॥ ॥सोयमग्निमतः॥ अवपथासि च॥ अनुदात्ते आकारा
दौ अवपथाः शब्दे परतो यजुषि एङ् प्रकृत्या॥ त्रिरुद्रेभ्यो अवपथाः॥ वपेः स्वार्थे लङि तिङ् तिङ् इत्यनुदात्तत्वं॥ अनुदात्ते किं॥ यद्रु

॥प्राणो अंगे अंगे अदीध्यत॥ अनुदात्ते च कुधपरे॥ ककार्यधकारे च परे अनुदात्ते परे एङ् प्रकृत्या यजुषि॥३॥

द्रेभ्यो वपथा॥ निपातैर्यद्यदिहंतेति निघातो न॥ आङोनुनासिकश्छंदसि॥ आङो चि परे अनुनासिकः स्यात् स च प्रकृत्या॥ अभ्र आँ अ
पः॥ गभीर आँ उग्रपुत्रे॥ ईषा अक्षादीनां छंदसि प्रकृतिभावो वक्तव्यः॥ ईषा अक्षो हिरण्ययः॥ ज्या इयं॥ पूषा अविष्टु॥ स्यश्छं
दसि बहुलं॥ स्य इत्यस्य सोर्लोपः स्याद्धलि॥ एष स्य भानुः॥ ह्रस्वाच्चंद्रोत्तरपदे मंत्रे॥ ह्रस्वात्परस्य चंद्रशब्दोत्तरपदस्य सुडागमः
स्यान्मंत्रे॥ हरिश्चंद्रो मरुद्गणः॥ सुश्चंद्र दस्म॥ पितरामातरा च छंदसि॥ द्वंद्वे निपातः॥ आमा गंतां पितरा मातरा च॥ चाद्विपरीतमपि
ति॥ न मातरा पितरा नू चिदिष्टौ॥ समानस्य छंदस्यमूर्धप्रभृत्युदर्केषु॥ समानस्य सः स्यान्मूर्धादिभिन्ने उत्तरपदे॥ छंदसि स्त्रियां च सगर्त्व:५
हुलं॥ विष्वग्देवयोरद्र्यादेरः॥ विष्वद्रीची॥ कद्रीची॥ देवद्रीचीं नयत देवयंतः॥ सधमादस्थयोश्छंदसि॥ सहस्य सधादेशः स्यात्॥ इ
न्द्रत्वास्मिन्त्सधमादे॥ सोमः सधस्थं॥ पथि च छंदसि॥ पथिशब्दे उत्तरपदे कोः कवकावौ च॥ कवपथः॥ कापथं कुपथं॥ साढ्यैसा
ढ्वा साढेति निगमे॥ सहेः क्त्वाप्रत्यये आद्यं ढयंतं निपात्यते॥ मरुद्भिरुग्रः पृतनासु साळ्हा॥ अचोर्मध्यस्थस्य ड
स्य ळः॥ ढस्य ळ्हश्च प्रातिशाख्ये विहितः॥ आहहि॥ द्वयाश्चास्य स्वरयोर्मध्यमेत्य संपद्यते स डकारो ळकारः॥ ळ्हकारतामेति स
एव चास्य ढकारः सन्नूष्मणा संप्रयुक्त इति॥ छंदसि च॥ अष्टन आ सम्याउत्तरपदे॥ अष्टापदी॥ मंत्रे सोमाश्वेंद्रियविश्व

॥विद्यावीनघृताचीव॥५॥

॥वैदिकी॥ देव्यस्य मंत्रे ॥ दीर्घः स्यात् ॥ अश्वावतीं सोमावतीं ॥ इन्द्रियावान्मदिंतमः ॥ विश्वकर्मणा विश्वदेव्यावता ॥ ओषधेश्च विभक्तावप्रथमा वे० प० अ०
॥सि०कौ०॥ यां ॥ यदोषधीभ्यः परिजायते विषं ॥ अदधादोषधीषु ॥ ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणां ॥ दीर्घः स्यात् ॥ आ तू न इन्द्र ॥ नू घ
॥२२॥ मर्त्तः ॥ उत वा घा स्यालात् ॥ मक्षू गोमन्तमीमहे ॥ भरता जातवेदसं ॥ तङ्ङिति यादेशस्य ङित्त्वपक्षे ग्रहणं ॥ तेनेह न ॥ शृणोत ग्रा
वाणः ॥ कूमनाः ॥ अत्रा ते भद्रा ॥ यत्रा नश्चक्रा ॥ उरुष्याणः ॥ इकः सुञि ॥ ऋचि दीर्घ इत्येव ॥ अभी षुणः सखीनां ॥ सुञ इति षः
न श्च धा ॥ [illegible] स्थोरुषुस्य इति णः ॥ द्व्यचोतस्तिङः ॥ मंत्रे दीर्घः ॥ विद्मा हि ॥ चक्रा जरसं ॥ निपातस्य ॥ एवा हि ते ॥ छंदस्युभ
५धाता यथा ॥ नामि दीर्घो वा ॥ धातृणामिति बहूवृचाः ॥ तैत्तिरीयास्तु ह्रस्वमेव पठंति ॥ वाषपूर्वस्य निगमे ॥ षपूर्वस्यानउपधाया वा
दीर्घः संबुद्धौ सर्वनामस्थाने परे ॥ ऋभु क्षाणं ॥ ऋभुक्षणं ॥ निगमे किं ॥ तक्षा ॥ तक्षाणौ ॥ जनिता मंत्रे ॥ इडादौ तृचि णिलो
पो निपात्यते ॥ यो नः पिता जनिता ॥ शमिता यज्ञे ॥ शमयिता इत्यर्थः ॥ युप्लुवोर्दीर्घश्छंदसि ॥ ल्यपीत्यनुवर्त्तते ॥ वियूय ॥ वि ॥२२॥
प्लूय ॥ आङ्जादीनां ॥ छंदस्यपि दृश्यते ॥ अनजादीनामित्यर्थः ॥ आनट् ॥ आवः ॥ न माङ्योगे ॥ बहुलं छंदस्यमाङ्
योगेपि ॥ जनिष्ठा उग्रः सहसे तुराय ॥ मा वः क्षेत्रे परे बीजान्यावपंतु ॥ इ रयोरे ॥ प्रथमं दध्र आपः ॥ रेभावस्याभीय

न्यवाप्सुः २

त्वेनासिद्धत्वादातो लोपः ॥ अत्र रेशब्दस्य द्विः कृते पुनरपि रेभावः ॥ तदर्थं सूत्रे द्विवचनांतं निर्दिष्टं इरयोरिति ॥ छंदस्युभयथा ॥
भूसुधियोर्यण् स्यात् ॥ इयङुवङौ च ॥ वनेषु चित्रं विभ्वं ॥ विभुवं वा ॥ सुध्यो नव्यमग्ने ॥ सुधियो वा ॥ तन्वादीनां छंदसि बहुलं ॥ त
वा०१ न्वं पुषेम ॥ तनुवं वा ॥ त्र्यंबकं ॥ त्रियंबकं ॥ तनिपत्योश्छंदसि ॥ एतयोरुपधालोपः क्ङिति प्रत्यये ॥ वितत्निरे कवयः ॥ शकुना इव पप्ति
म ॥ घसिभसोर्हलि च ॥ सग्धिश्च मे ॥ बब्धां ते हरी धानाः ॥ हुझल्भ्यो हेर्धिः ॥ श्रुशृणुपॄकृवृभ्यश्छंदसि ॥ श्रुधी हवं ॥ शृणुधी गि
तारंधि० रः ॥ रायस्पूर्द्धि ॥ अपावृधि ॥ वा छंदसि ॥ हि रपिद्वा ॥ अङितश्च ॥ हेर्धिः स्यात् ॥ रमेर्धर्षे येन परस्मैपदं ॥ शपः श्लुः ॥ अभ्यासदीर्घश्च
रारंधि ॥ अस्मे प्रयंधि ॥ युयोधि जातवेदः ॥ यमेः शपो लुक् ॥ योतेः शपः श्लुः ॥ मंत्रेष्वाङ्यादेरात्मनः ॥ आत्मन्शब्दस्यादेर्लोपः
स्यादाङि ॥ त्मना देवेषु ॥ विभाषर्जोश्छंदसि ॥ ऋजुशब्दस्य ऋतः स्थाने रः स्याद्दिलेमेयःसु ॥ त्वं रजिष्ठमनुनेषि ॥ ऋजिष्ठं वा ह०४
ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि छंदसि ॥ ऋतो भवं ऋत्व्यं ॥ वास्तुनि भवं वास्त्व्यं ॥ वास्त्वं च ॥ मधुशब्दस्य अणि स्त्रियां यणा
देशो निपात्यते ॥ माध्वीर्नः संत्वोषधीः ॥ हिरण्यशब्दाद्विहितस्य मयटो मशब्दस्य लोपो निपात्यते ॥ हिरण्ययेन सविता रथेन ॥
॥ इति षष्ठः ॥ शीङो रुट् ॥ बहुलं छंदसि ॥ रुडागमः स्यात् ॥ लोपस्त आत्मनेपदेष्विति तलोपः ॥ धेनवो दुह्रे ॥ लोपाभावे च

धेमेटा २

तंडुह्नते॥ अह्नस्थमस्य॥ अंतोभिस्ऐस्॥ बहुलं छंदसि॥ अग्निर्देवेभिः॥ नेतराच्छंदसि॥ स्वमोरद्ड्डुन॥ शार्म्यच्छिन्नमितरं॥ छंदसि किं॥ इत वै० स० अ०
॥सि०कौ०॥ रत्काष्ठं॥ क्वोत्यप्र॥ क्वापि छंदसि॥ यजमानं परिधापृथिव्या॥ सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः॥ आर्जवः संतु पंथाः॥
॥१३९॥ पंथानइति प्राप्ते सुः॥ परमे व्योमन्॥ व्योमनि ङि इति प्राप्ते ङेर्लुक्॥ धीती॥ मती॥ सुष्टुती॥ धीत्या मत्या सुष्टुत्येति प्राप्ते पूर्वसवर्णः॥ या
सुरथा रथीतमा॥ दिविस्पृशा अश्विना॥ यावौ सुरथौ दिविस्पृशावित्यादौ प्राप्ते आ॥ नताद्ब्राह्मणं॥ नतमिति प्राप्ते आ
त्॥ यादेव विद्म तात्वा॥ यं तमिति प्राप्ते आत्॥ न युष्मे वाजबंधवः॥ अस्मे इंद्राबृहस्पती॥ युष्मासु अस्मभ्यमिति प्राप्ते शे॥ उ अस्मास्विति
रुया॥ धृष्णुया॥ उरुणा धृष्णुनेति प्राप्ते या॥ नाभा पृथिव्याः॥ नाभाविति प्राप्ते डा॥ ता अनुष्ठ्योच्यावयतात्॥ अनुष्ठानमनुष्ठा व्य
वस्थावदङ्॥ आङो ड्या॥ साधुया॥ साध्वीति प्राप्ते याच्॥ वसंता यजेत॥ वसंते इति प्राप्ते आल्॥ इयाडियाजीकाराणामुपसं
ख्यानं॥ उर्विया॥ दार्विया॥ उरुणा दारुणेति प्राप्ते इया॥ सुक्षेत्रिया॥ सुक्षेत्रेणेति प्राप्ते डियाच्॥ दृतिं न शुष्कं सरसी शया ॥१३९॥
नं॥ ङेरीकार इत्यादि ङीः॥ तत्राद्युदात्ते पदे प्राप्ते व्यत्ययेनांतोदात्तता॥ वस्तुतस्तु ङीषेतान् ङेर्लुक्॥ ईकारादयस्य तदाद्र
णांतरं समग्र्यं॥ आङयाजयाराणामुपसंख्यानं॥ प्रबाहवा सिसृतं॥ बाहुनेति प्राप्ते आङादेशः॥ घेर्ङितीति गुणः स्वप्न

या॥ स्वप्नेनेति प्राप्ते अयाच्॥ स नः सिंधुमिव नावया॥ नावेति प्राप्ते अयाच्॥ रित्स्वरः॥ अमो मश्॥ मिबादेशस्यामो मश् स्यात्॥ अकार
उच्चारणार्थः॥ शित्वात्सर्वादेशः॥ अस्तिसिचोऽपृक्ते इतीट्॥ वधीं वृत्रं॥ अवधिषमिति प्राप्ते॥ लोपस्त आत्मनेपदेषु॥ छंदसि॥ देवा अ
दुह्र॥ अदुहतेति प्राप्ते॥ दक्षिणतः शये॥ शेते इति प्राप्ते॥ आत्मनेति किं॥ उत्संदुहंति॥ ध्वमो ध्वात्॥ अंतरेवोष्माणं वारयध्वा
त्॥ वारयध्वमिति प्राप्ते॥ यजध्वैनमिति च॥ एनमित्यस्मिन्परे ध्वमो वलोपो निपात्यते॥ यजध्वैनं प्रियमेधाः॥ वकारस्य यका
रो निपात्यत इति वृत्तिकारोक्तिः प्रामादिकी॥ तस्य तात्॥ मध्यमपुरुषबहुवचनस्थाने तात्स्यात्॥ गात्रमस्य॥ नूनं कृणुतात्॥
कृणुतेति प्राप्ते॥ सूर्यं चक्षुर्गमयतात्॥ गमयतेति प्राप्ते॥ तप्तनप्तनथनाश्च॥ तस्येत्येव॥ शृणोत ग्रावाणः॥ शृणुतेति प्राप्ते
तप्॥ सुनोतन पचत ब्रह्मवाहसे॥ दधातन द्रविणं॥ तनप्॥ मरुतस्तज्जुजुष्टन॥ जुषध्वमिति प्राप्ते व्यत्ययेन परस्मैपदं श्लुश्च
विश्वे देवासो मनुषो यतिष्ठन॥ यतिस्स्याकाः स्थेत्यर्थः॥ यच्छब्दाच्छांदसो डतिः॥ थस्य थनादेशः॥ इदंतो मसि॥ मसीत्यवि
भक्तिको निर्देशः॥ इकार उच्चारणार्थः॥ मस् इत्ययमपि इकाररूपावयवविशिष्टः स्यात्॥ मस इदागमः स्यादिति या
वत्॥ नमो भरंत एमसि॥ त्वमस्माकं तव स्मसि॥ इमः स्म इति प्राप्ते॥ क्त्वो यक्॥ दिवं सुपर्णो गत्वाय॥ इष्ट्वीनमिति च॥ क्त्वाप्रत्य
यस्य ईनान्तादेशो निपात्यते॥ इष्ट्वीनं देवान्॥ इष्ट्वेति प्राप्ते॥ स्नात्व्यादयश्च॥ आदिशब्दः प्रकारार्थः॥ आकारस्य॥

२
॥सि०कौ० इकारो निपात्यते ॥ स्नात्वी मलादिव ॥ पीत्वी सोमस्य वावृधे ॥ स्नात्वा पीत्वेति प्राप्ते ॥ आज्जसेरसुक् ॥ अवर्णांतादंगात्प वै० स० अ०
रस्य जसोऽसुगागमः स्यात् ॥ देवासः ब्राह्मणासः ॥ श्रीग्रामण्योश्छंदसि ॥ आमो नुट् ॥ श्रीणामुदारो धरुणो रयीणां ॥ सुतग्रा
॥१२९॥ मणीनां ॥ गोः पादांते ॥ विद्मा हि त्वा गोपतिं शूर गोनां ॥ पादांते किं ॥ गवां शता पृक्ष यामेषु ॥ पादांतेपि क्वचिन्न ॥ छंदसि सर्वे विधयो वि पत्रे ५
कल्पिकत्वात् ॥ विराजं गोपतिं गवां ॥ छंदस्यपि दृश्यते ॥ अस्थ्यादीनामनङ् ॥ इंद्रो दधीचो अस्थभिः ॥ ई च द्विवचने ॥ अस्थ्यादीनां
मित्येव ॥ अक्षीभ्यां ते नासिकाभ्यां ॥ दृक्स्ववस्स्वतवसां छंदसि ॥ एषां नुम् स्यात् सौ ॥ कीदृङ्ङिंद्र ॥ स्ववान् ॥ स्वतवान् ॥ उदोष्ठ्यपूर्वस्य
बहुलं छंदसि ॥ ऋकारांतस्य धातोरंगस्य बहुलमुकारादेशः स्यात् ॥ ततुरिः ॥ ह्रु ह्वरेश्छंदसि ॥ ह्वरेर्निष्ठायां ह्रु आदेशः स्यात् ॥ अ
ह्रुतमसि हविर्धानं ॥ अपरिह्वृताश्च ॥ पूर्वेण प्राप्तस्यादेशाभावो निपात्यते ॥ अपरिह्वृताः सनुयाम वाजं ॥ सोमे ह्वरितः ॥
॥ इड्गुणौ निपात्येते ॥ मा नः सोमो ह्वरितः ॥ ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्तविशस्तृशंस्तृशास्तृतरुतृत ॥१२९॥
रूतृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरितिक्षमितिवमित्यमितीति च ॥ अष्टादश निपात्यंते ॥ तत्र ग्रसु स्कंभु स्तंभु एषा
मुदित्वान्निष्ठायामिट् ॥ प्रतिषेधे प्राप्ते इण्णिपात्यते ॥ युवं शचीभिर्ग्रसिताममुंचतं ॥ विष्कभिते अजरे ॥ येन स्वः स्तभि

तं ॥ सत्येनोत्तभिता भूमिः ॥ स्तभितेत्येव सिद्धे उत्पूर्वस्य पुनर्निपातनमन्योपसर्गपूर्वस्य माभूदिति ॥ चते याचने ॥ कस गतौ ॥ आ
भ्यां क्तस्येडभावः ॥ चत्तो इतश्चत्तामुतः ॥ त्रिधा ह श्यावमश्विना विकस्तं ॥ उत्ताना या हृदयं यद्विकस्तं ॥ निपातनं बहुत्वापेक्षं सू
त्रे बहुवचनं विकस्ता इति ॥ तेनैकवचनांतेपि प्रयोगः साधुरेव ॥ शसु शंसु शासु एभ्यस्तृच इडभावः ॥ एकस्त्वष्टुरश्वस्या विशस्ता
ग्रावग्राभ उत शंस्ता ॥ प्रशास्ता पोता ॥ तरतेरीड् ऋओश्चेत्तृच उट् ऊट् एतावागमौ निपात्येते ॥ तरुतारं रथानां ॥ तरूतारं ॥ तरुता
रं ॥ वरुतारं ॥ वरूत्रीभिः सुशरणो नो अस्तु ॥ अत्र ङीबंतनिपातनं प्रपंचार्थं ॥ वरूतृशब्दस्तु निपातितः ॥ ततो ङीपा गतार्थ
त्वात् ॥ उज्ज्वलादिभ्यश्चतुर्भ्यः शप इकारादेशो निपात्यते ॥ ज्वल दीप्तौ ॥ क्षर संचलने ॥ टुवम उद्गिरणे ॥ अम गत्यादिषु ॥ इह क्षमती
त्यनंतरं क्षमितीत्यपि केचित्पठंति ॥ तत्र क्षमूष् सहने ॥ इति धातुर्बोध्यः ॥ भाषायां तु ग्रस्तः स्कब्धः स्तब्धः उत्तब्धः चतितः विकसि
तः विशसिता शंसिता शासिता तरिता तरीता वरिता वरीता उज्ज्वलति क्षरति पाठांतरं क्षमति वमति अमति ॥ बभूथाततंथजगृ
भ्मववर्थेति निगमे ॥ विद्मा तमुत्सं यत आबभूथ ॥ येनांतरिक्षमुर्वाततंथ ॥ जगृभ्मा ते दक्षिणमिंद्र हस्तं ॥ त्वं ज्योतिषा वितमो
ववर्थ ॥ भाषायां तु बभूविथ ॥ आतेनिथ जगृहिम ववरिथेति ॥ सनिंससनिवांसं ॥ सनिमित्येतत्पूर्वात्सनतेः सनोतेर्वा क्व

सोरिट्॥ ए[illegible]त्वाभ्यासलोपाभावश्च निपात्यते॥ पावकादीनां छंदसि॥ प्रत्ययस्थात्कादित्वं नेतिवाच्यं॥ हिरण्यवर्णाः शुचयः पाव वे० म० भ०
॥सि०५०॥ काः॥ घोर्लोपो लेटि वा॥ दधद्रत्नानि दाशुषे॥ सोमो ददद्गंधर्वाय॥ यदग्निरग्नये ददात्॥ मीनातेर्निगमे॥ शिशीतिह्रस्वः प्रमिनंति॥ लोके हृं
॥१४०॥ प्रमीणाति॥ अस्तिसिचोपृक्ते॥ बहुलं छंदसि॥ सर्वमा इदं॥ ह्रस्वस्य गुणः॥ जसि च॥ जसादिषु छंदसि वा वचनं णौ चङ्युपधायाः॥ अपा
शतक्रत्वो यूयं॥ शतक्रतवः॥ पश्वे नृभ्यो यथा गवे॥ पशवे॥ नाभ्यस्तस्याचीति निषेधे बहुलं छंदसीति वक्तव्यं॥ आनुषक् जुजो
षत्॥ नित्यं छंदसि॥ नित्यं छंदसि विषये चङ्युपधाया ऋवर्णस्य ऋ नित्यं॥ अवीवृधत्॥ न छंदस्यपुत्रस्य॥ पुत्रभिन्नस्यादंतस्य क्य
चि ईत्वदीर्घौ न॥ मित्रयुः॥ क्याच्छंदसीत्युः॥ अपुत्रस्य किं॥ पुत्रीयंतः सुदानवः॥ अपुत्रादीनामिति वाच्यं॥ जनीयंतो न्वग्रवः॥ जनमिच्छ
त इत्यर्थः॥ दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति॥ एते क्यचि निपात्यंते॥ भाषायां तु प्रत्ययाभावात्॥ दुष्टीयति॥ द्रविणीयति॥
अचएतयोः वृषीयति॥ रिष्टीयति॥ अश्वाघस्यात्॥ अश्वघस्य एतयोः क्यचि आत्स्यात् छंदसि॥ अश्वायंतो मघवन्॥ मा त्वा वृका अघायवः॥ न
छंदसीति निषेधो न ईत्वमात्रस्य किंतु दीर्घस्यापीति अत्रेदमेव सूत्रं ज्ञापकं॥ देवसुम्नयोर्यजुषि काठके॥ अनयोः क्यचि आ ॥१४०॥
त्स्यात् यजुषि कठशाखायां॥ देवायंतो यजमानाः॥ सुम्नायंतो हवामहे॥ इह यजुःशब्दो न मंत्रमात्रपरः किंतु वेदोपलक्षकः॥

तेन ऋगात्मकेपि मंत्रे यजुर्वेदस्थे भवति॥ किंच॥ ऋग्वेदेपि भवति स चेन्मंत्रो यजुषि कठशाखायां दृष्टः॥ यजुषि किं॥ देवाञ्जिगाति सुम्न
युः॥ बह्वृचानामप्यस्ति कठशाखा॥ ततो भवति प्रत्युदाहरणमिति हरदत्तः॥ कव्यध्वरपृतनस्यर्चि लोपः॥ क्यचि॥ सपूर्वया निविदा कव्यता
योः॥ अध्वर्युं वा मधुपाणिं॥ दमयंतं पृतन्यून्॥ दध्यातेर्हिः॥ जहातेश्च क्त्वि॥ विभाषा छंदसि॥ हित्वा शरीरं॥ सुधितवसुधितनेमधित हात्वा वा॥
परे धिष्वधिषीय च॥ सुधित वसुधित नेमधित एतत्पूर्वस्य दधातेः क्तप्रत्यये इत्वं निपात्यते॥ गर्भं माता सुधितं वक्षणासु॥ वसुधितमग्नौ॥ नेमधिताम्
पौंस्या॥ धिष्व वा पिदृश्यते॥ उतश्वेतं वसुधितिं निरेके॥ धिष्व वज्रं दक्षिण इंद्र हस्ते॥ धत्स्वेति प्राप्ते॥ सुरेता रेतो धिषीय॥ आशीर्लि
ङ्॥ इट् इत्॥ धासीयेति प्राप्ते॥ आपो भि॥ मासश्छंदसीति वक्तव्यं॥ माद्भिः शरद्भिः॥ वस्स्व स्वतवसोरुषसश्चेष्यते॥ वस्वद् स्व
स्ववद्भिः भिः॥ अवतेरसुन्॥ शोभनमवो येषां ते स्ववसः॥ तैः॥ तु इति सौत्रो धातुस्तस्मादसुन्॥ स्वतवो येषां ते स्वतवसः॥ समुषद्भि
रजायथाः॥ मिथुनेसिः॥ वसेः किच्चेत्यसिप्रत्यय इति हरदत्तः॥ पंचपाद्यां तु उषः किदिति प्रत्याख्यातं॥ न कवतेर्यङि॥ कृष
श्छंदसि॥ यङि अभ्यासस्य चुत्वं न॥ करीकृष्यते॥ दाधर्ति दर्धर्ति दर्धर्षि बोभूतु तेतिक्तेलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनि
क्रदद्भरिभ्रद्दविध्वतो दविद्युतत्तरित्रतः सरीसृपतं वरीवृजन्मर्मृज्यागनीगंतीति च॥ एतेष्टादश निपा[illegible]त्यंते॥ आद्यस्त्र

॥शतरिश्लौअभ्यासस्यप्रसंप्रसारणाभावो ऽत्वंविगागमश्च॥५

यङ्लुकोधारयतेर्वा॥ भवतेर्यङ्लुगंतस्यगुणाभावः तेनभाषायांगुणोलभ्यते॥ तिजेर्यङ्लुगंतात्तन॥ इ च लिटिहलादिशेषापवादो ॥वें०मन्त्र०अ०

॥सि०कु०॥ रेफस्यलत्वं॥ इत्वाभावश्चनिपात्यते॥ अलर्षियुध्मरवजऋत्पुरंदर॥ सिपानिर्देशोनतंत्रं॥ अलर्तिर्दक्षउत॥ फणतेःआङ्पूर्वस्ययङ्लु

॥१५१॥ गंतस्यशतरिअभ्यासस्यनीगागमोनिपात्यते॥ अन्वापनीफणत्॥ स्यंदतेःसंपूर्वस्ययङ्लुकिशतरिअभ्यासस्यनिग्धातोस्सकार॥

स्यषत्वं॥ करोतेर्यङ्लुगंतस्याभ्यासस्यचुत्वाभावः॥ कंदेर्लुङि चुरङ्द्विर्वचनं॥ अभ्यासस्यचुत्वाभावोनिगागमश्च॥ कनिक्रद

ज्जनुषं॥ अक्रंदीदित्यर्थः॥ बिभर्तेरभ्यासस्यजश्त्वाभावः॥ बिभ्रिभर्भिरिश्नोदोषधीषु॥ ध्वरतेर्यङ्लुगंतस्यशतरिअभ्यासस्यविगागमश्चो

धातोरकारलोपश्च॥ दविध्वतोरश्मयःसूर्यस्य॥ द्युतेरभ्यासस्यसंप्रसारणाभावोत्वंविगागमश्चनिपात्यते॥ दविद्युतद्दीयच्छोशु

चानः॥ तरतेःशतरिश्लौअभ्यासस्यरिगागमः॥ स्थपेःशतरिश्लौद्वितीयैकवचनेभ्यासस्यरिगागमः॥ अंजेःशतरिश्लावभ्यासस्य ॥१५१॥

रा रीक्॥ मृजेर्लिटिणल्॥ अभ्यासस्यरुक्धातोश्चयुक्॥ गमेश्चाङ्पूर्वस्यलिटिश्लौवाभ्यासस्यचुत्वाभावोनीगागमश्च॥ रक्ष्यंती

वेदागनीगंतिकर्णं॥ ससूवेतिनिगमे॥ सूतेर्लिटिपरस्मैपदंवुगा गमोभ्यासस्यचुत्वंनिपात्यते॥ ग्रसिःससस्वस्कविरं॥ सुपुवर्द रा

तिनावाया॥ बभूवेत्यादि॥ बक्रलंछंदसि॥ अभ्यासस्यइकारःस्याच्छंदसि॥ पूर्णांविवष्टिविशोरेतद्रूपं॥ इतिसप्तमः॥ प्रसमुपोदःपादपूरणे॥

एषांद्वित्वंपादपूरणे॥ प्रप्रायमग्निः॥ संसमिद्युवसेवृषन्॥ उपोपमेपरामृश॥ किंनोदुदुहर्षसे॥ छंदसीरः॥ इवर्णान्तात्परस्य

॥शतरिश्लौअभ्यासस्यरिगागमोभ्यासस्य॥ रिजेःशतरिश्लावभ्यासस्यरीक्॥ मघघ्नोशुचानः॥

मतोर्मस्यवःस्यात्॥ हरिवतेहर्यश्वाय॥ गीर्वान्॥ अनोनुट्॥ अन्नंतान्मतोर्नुट्स्यात्॥ अक्षण्वंतःकर्णवंतः॥ अस्थन्वंतंयदनस्था॥ नाद्घस्य

नातात्परस्यघस्यनुट्॥ सुपथिंतरः॥ भूरिदावत्तरः॥ इद्वक्तव्यः॥ भूरिदावत्तरोजनः॥ ईद्रथिनः॥ रथीतरः॥ रथीतमंरथीनां॥ नसत्तनिष

त्तानुत्तप्रतूर्तसूर्तगूर्तानिछंदसि॥ सदेर्नञ्पूर्वान्निपूर्वाच्चनिष्ठायांनत्वाभावोनिपात्यते॥ नसत्तमंजसा॥ निषत्तमस्यचरतः॥ असन्न

निषण्णमितिप्राप्ते॥ उन्देर्नञ्पूर्वस्यअनुत्तं॥ प्रतूर्तमितितिलेरतेः॥ तुर्वरत्वस्यवा॥ सूर्त्तमिति सृइत्यस्य॥ गूर्त्तमिति॥ गुरीत्यस्य॥ अम्नरू

धरवरित्युभयथाछंदसि॥ रुर्वारिफोवा॥ अम्नएव॥ अम्नरेव॥ ऊधएव॥ ऊधरेव॥ अवएव॥ अवरेव॥ भुवश्चमहाव्याहृतेः॥ भुवइति॥

भुवरिति॥ ओमभ्यादाने॥ ओंशब्दस्यप्लुतःस्यादारंभे ओ३म्॥ अग्निमीळेपुरोहितं॥ आदानेकिं॥ ओमित्येकाक्षरंब्रह्म॥ येयज्ञक भ्या

र्मणि॥ येयजामहे॥ यज्ञेकिं॥ येयजामहे॥ प्रणवष्टेः॥ यज्ञकर्मणिटेरोमित्यादेशःस्यात्॥ अपांरेतांसिजिन्वतो३म्॥ टेःकिं॥

हलंतेंत्यस्यमाभूत्॥ याज्यांतः॥ येयाज्यांतामंत्रास्तेषामंत्यस्यटेःप्लुतोयज्ञकर्मणि॥ जिह्वामग्नेचकृषेहव्यवाहा३म्॥ अंतःकिं॥ याज्या

नामवाक्यसमुदायरूपाणांप्रतिवाक्यंटेःस्यात्॥ सर्वांत स्यचेष्यते॥ ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः॥ एषामादेःप्लु

गोमयाति तोयज्ञकर्मणि॥ अग्नयेनुब्रू३हि॥ अग्नयेप्रे३ष्य॥ अस्तुश्रौ३षट्॥ सोमस्याग्नेवीही३वौ३षट्॥ अग्निमा३वह॥ अग्नीत्प्रेषणे

४ परस्य च॥ आग्नीध्रः प्रेषणे आदेः प्लुतः तस्मात्परस्य च॥ ओ३श्रा३वय॥ विभाषा पृष्टप्रतिवचने हेः प्लुतः॥ अकार्षीः कटं॥ अकार्षं हि३ अ
॥सि०कौ०॥ कार्षं हि॥ पृष्ट इति किं॥ कटं करिष्यति हि॥ हेः किं॥ करोमि ननु॥ निगृह्यानुयोगे च॥ अत्र यद्वाक्यं तस्य टेः प्लुतो वा॥ अद्यामावास्य३ वै० अ० अ० कटं २
॥१४२॥ इत्यात्थ॥ अमावास्येत्येवंवादिनं युक्त्या स्वमतात्प्रच्याव्य एवमनुयुज्यते॥ आम्रेडितं भर्त्सने॥ दस्यो दस्यो३ घातयिष्यामि त्वां॥ यु
क्तिग्रहणं द्विरुक्तोपलक्षणं॥ चौर२ चौर चौर३ चौर॥ अंगयुक्तं तिङाकांक्षं॥ अंगेत्यनेन युक्तं तिङन्तं प्लवते॥ अंग कूज३
किं इदानीं ज्ञास्यसि जाल्म॥ तिङ् किं॥ अंग देवदत्त मिथ्या वदसि॥ आकांक्षं किं॥ अंग पच नैतदपरमाकांक्षति॥ भर्त्सने इत्येव॥ अंगा
धीष्व भक्तं तव दास्यामि॥ विचार्यमाणानां॥ वाक्यानां टेः प्लुतः॥ होतव्यं दीक्षितस्य गृहा३इ न होतव्यमिति॥ होतव्यं न होतव्य
मिति विचार्यते॥ प्रमाणैर्वस्तुतत्वपरीक्षणं विचारः॥ पूर्वं तु भाषायां॥ विचार्यमाणानां पूर्वमेव प्लवते॥ अहिर्नु३ रज्जुर्नु॥ प्र
ग्र योगापेक्षत्वं पूर्वत्वं॥ इह भाषाग्रहणात्पूर्वयोगश्छंदसीति ज्ञायते॥ प्रतिश्रवणे च॥ वाक्यस्य टेः प्लुतोऽभ्युपगमे प्रतिज्ञाने श्र ॥१४२॥
वणाभिमुख्ये च॥ गां मे देहि भो३॥ हंत ते ददामि३॥ नित्यः शब्दो भवितुमर्हति३॥ दत्त किमात्थ३॥ अनुदात्तं प्रश्नान्ताभिपू
जितयोः॥ अनुदात्तः प्लुतः स्यात्॥ दूराद्धूतादिषु सिद्धस्य प्लुतस्यानुदात्तत्वमात्रमनेन विधीयते॥ अग्निभूत३ इ पटा३

॥ अग्निरिव भायात्॥ उपमार्थे किं॥ कथंचिदाहुः॥ प्रयुज्यमाने किं॥ अग्निर्माणवको भायात्॥ २४
उ॥ अग्निभूते पटो एतयोः प्रश्नान्ते टेरनुदात्तः प्लुतः॥ शोभनः खल्वसि माणवक३॥ चिदिति चोपमार्थे प्रयुज्यमाने॥ वाक्यस्य टेर
नुदात्तः प्लुतः॥ अग्निश्चिद्भायात्३॥ उपरिस्विदासीदिति च॥ टेः प्लुतोऽनुदात्तः स्यात्॥ उपरिस्विदासी३त्॥ अधःस्विदासी३त् इत्यत्र तु
विचार्यमाणानामित्युदात्तः प्लुतः॥ स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु॥ स्वरितः प्लुतः स्यादाम्रेडिते परे॥ असूया
दिगम्ये॥ असूयायां॥ अभिरूपक३ अभिरूपक रिक्तं ते आभिरूप्यं॥ संमतौ॥ अभिरूपक३ अभिरूपक शोभनोऽसि॥ को
पे॥ अविनीतक३ अविनीतक इदानीं ज्ञास्यसि जाल्म॥ कुत्सने॥ शाक्तीक३ शाक्तीक रिक्ता ते शक्तिः॥ क्षियाशीःप्रैषेषु ति
ङाकांक्षं॥ आकांक्षस्य तिङन्तस्य टेः स्वरितः प्लुतः स्यादाचारभेदे॥ स्वयमश्वेन याति३ उपाध्यायं पदातिं गमयति॥ प्रा
र्थनायां॥ पुत्रांश्च लप्सीष्ट३ धनं च तात॥ व्यापारणे॥ कटं कुरु३ ग्रामं गच्छ॥ आकांक्षं किं॥ दीर्घायुरसि॥ अग्निद्ग्नी निहर॥ अ
नंत्यस्यापि प्रश्नाख्यानयोः॥ अनंत्यस्यापि पदस्य टेः स्वरितः प्लुत एतयोः॥ अगम३ः पूर्वा३न् ग्रामा३न्॥ सर्वपदानामयं॥
आख्याने॥ अगम३ः पूर्वा३न् ग्रामा३न्॥ प्लुतावैच इदुतौ॥ ऐ३तिकायन॥ औ३पगव॥ चतुर्मात्रावेवौ संपद्येते॥ एचो
स्या ऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ॥ अप्रगृह्यस्य एचोऽदूराद्धूते प्लुतविषये पूर्वस्यार्धस्याकारः प्लुतः स्यादु
॥ दूराद्धूतादिषु प्लुतो विहितस्तत्रैव एचः प्लुतप्रसंगे तदवयवाविदुतौ प्लवेते॥ २५॥

७५

तस्य तवर्गस्य इकारोकारौ स्तः प्रश्नांताभिपूजितविचार्यमाणप्रत्यभिवादयाज्यांतेष्वेव ॥ प्रश्नांते ॥ अगमः पूर्वान् यामान् ॥ अग्निभू वै० अ० अ०
॥सि०कु०॥ ता३इ ॥ अभिपूजिते ॥ भद्रं करोषि पट३उ ॥ विचार्यमाणे ॥ होतव्यं दीक्षितस्य गृह३इ ॥ प्रत्यभिवादे ॥ अपि अग्निभूत३इ ॥ याज्यां
ते ॥ स्तोमैर्विधेमाग्नय३इ ॥ परिगणनं किं ॥ विस्तु भूत३ घातयिष्यामि त्वा ॥ अदूराद्धूत इति नैव कर्तव्यं ॥ पदांतग्रहणं कर्तव्यं ॥ इहमाभू
।२४३। त् ॥ भद्रं करोषि गौ३रिति ॥ अप्रगृह्यस्य किं ॥ शोभने माले३ ॥ आमंत्रिते छंदसि प्लुतविकारोयं वक्तव्यः ॥ अग्ना३इ पत्नीव ॥ तयोर्य्वाव
चि संहितायां ॥ इउतोर्यकारवकारौ स्तोचि संहितायां ॥ अग्ना३याशा ॥ पट वाशा ॥ अग्ना३यिदं ॥ पटा३वुदकं ॥ अचि किं ॥ अ
ग्ना३इ ॥ संहितायां किं ॥ अग्ना३इ इंद्रं ॥ संहितायामित्याध्यायसमाप्तेरधिकारः ॥ इउतोरसिद्धत्वादयमारंभः ॥ सवर्णदीर्घत्व
स्य शाकल्यस्य वा निवृत्त्यर्थं ॥ पूर्वयोरसिद्धत्वादुदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्येत्यस्य बाधनार्थं वा ॥ मतुवसोरुसंबु
द्धौ छंदसि ॥ रु इत्यविभक्तिको निर्देशः ॥ मत्वंतस्य वस्वंतस्य च रुः स्यात् ॥ अलोंत्यपरिभाषया नकारस्य ॥ इंद्र मरुत्व इह पाहि ।२४२।
सोमं ॥ हरिवो मेदिनं त्वा ॥ छंदसीरइति वत्वं ॥ दाश्वान् साह्वान् मीढ्वांश्च ॥ एते छंदसि निपात्यंते ॥ मीढ्वस्तोकाय तनयाय
वन उपसंख्यानं ॥ कनिब्वनिपोः सामान्येन ग्रहणं ॥ अनुबंधस्येह निर्देशात् ॥ यस्त्वायंतं वसुना प्रातरित्वः ॥ इणः कनिप् ॥

उभयथर्क्षु ॥ अम्परे छविनस्य रुर्वा ॥ पश्हन्तांश्चके ॥ दीर्घादटि समानपादे ॥ दीर्घान्नकारस्य रुर्वा स्यादटि तौ चेन्नादौ एकपादस्थौ
स्यातां ॥ देवाँ अच्छा सुमती ॥ महाँ इंद्रो य ओजसा ॥ उभयथेत्यनुवृत्तेर्नेह ॥ आदित्यान् याचिषामहे ॥ आतोटि नित्यं ॥ अटि पर
तो रोः पूर्वस्यातः स्थाने नित्यमनुनासिकः ॥ महाँ इंद्रः ॥ तैत्तिरीयास्तु अनुस्वारमधीयते ॥ तत्र छांदसो व्यत्यय इति प्रांचः ॥ एवं च सू
त्रस्य फलं चिंत्यं ॥ स्वतवान् पायौ ॥ रु वा ॥ भुवस्त्वस्य स्वतवाँ पायुरग्ने ॥ छंदसि वाप्राम्रेडितयोः ॥ विसर्गस्य सो वा स्यात् कुप्वोः प्रशब्दमा
म्रेडितं च वर्जयित्वा ॥ अग्ने त्रातस्तनस्कविः ॥ गिरिर्न विश्वतस्पृथुः ॥ नेह ॥ वसुनः पूर्व्यस्पतिः ॥ अप्रेत्यादि किं ॥ अग्निः प्रविद्वान्
परुषः परुषः ॥ कः करत्करतिकृधिकृतेष्वनदितेः ॥ विसर्गस्य सः स्यात् ॥ प्रदिवो अप्नस्कः ॥ यथा नो वस्यसस्करत् ॥ सुपेशसस्
करति ॥ उरुणस्कृधि ॥ सोमं न चारुं मघवत्सु नस्कृतं ॥ अनदितेरिति किं ॥ यथा नो अदितिः करत् ॥ पंचम्याः परावध्यर्थे
पंचमी विसर्गस्य सः स्यादुपरिभावार्थे परिशब्दे परतः ॥ दिवस्परि प्रथमं जज्ञे ॥ अध्यर्थे किं ॥ दिवस्पृथिव्याः पर्योजः ॥ पा
तौ च बहुलं ॥ पंचम्या इत्येव ॥ स नो दिवस्पातु ॥ षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु ॥ वाचस्पतिं विश्वकर्माणं ॥ दिव
स्पुत्राय सूर्याय ॥ दिवस्पृष्ठं भंदमानः ॥ तमसस्पारमस्य ॥ परिवीत इळस्पदे ॥ दिवस्पयो दिधिषाणाः ॥ रायस्पोषं यजमानेषु

४ निरस्तपतावनासेवने॰॥ निसःसकारस्यमूर्धन्यादेशःस्यात॥ निष्टप्तंरक्षोनिष्टप्ताअरातयः अनासेवनेकिं॥ निस्तपतिपुनपुनस्तपतीत्यर्थः॰ ४

१९ ईडायावा॥ पतिपुत्रादिषु॥ इडायास्पुत्रः॥ इडायास्पदे॥ युष्मत्ततत्क्षु॰ अंतःपादं॥ पादमध्यस्यसस्यमूर्धन्यःस्यात्तकारादि वै० अ० समा०

॥सि०कौ०॥ ष्वेषुपरेषु॥ युष्मदादेशाः॥ त्वंत्वांतेतवाः॥ त्रिभिष्टुंदेवसवितः॥ तेभिष्ट्वा॥ आभीष्ट॥ अप्स्वग्नेसधिष्टव॥ अग्निष्टद्विश्वं॥ द्यावा

॥१५४॥ पृथिवीनिष्टतक्षुः॥ अंतःपादंकिं॥ नदग्निस्तदर्य मा॥ यन्मआत्मनोमिन्दाभूदग्निस्तत्पुनराहाजातवेदाविचर्षणिः॥ अत्राग्नि

रितिपूर्वपादस्यांतोनतुमध्यः॥ यजुष्येकेषां॥ युष्मत्तत्ततक्षुषुपरतसस्यमूर्धन्यावा॥ अर्चिर्भिष्टं॥ अग्निष्टग्रं॥ अर्चिर्भि

स्तत्क्षुः॥ पक्षाविभिस्त्वमित्यादि॥ स्तुतस्तोमयोश्छंदसि॥ नभिष्टुतस्य॥ गोष्टोमं॥ गोस्तोमं॥ पू र्वपदादित्येवसिद्धे प्रपं नतिःस्तुतस्य

चार्थमिदं॥ पूर्वपदात्॥ पूर्वस्थान्निमित्तात्परस्यसस्यषोवा॥ यदिंद्राग्नीदिविष्ठः॥ युवंहिस्थः स्वर्पती॥ सुञः॥ पूर्वपदस्थान्नि

मित्तात्परस्यसुञोनिपातस्यसस्यषः॥ ऊर्ध्वऊषुणः॥ अभीषुणः॥ सनोतेरनः॥ गोषाइंद्रोनृषाअसि॥ अनःकिं॥ गोसनिः॥ सहेः

पृतनर्ताभ्यांच॥ पृतनाषाहं॥ ऋतषाहं॥ निव्यभिभ्योड्व्यवायेवाछंदसि॥ सस्यमूर्धन्यः॥ न्यषीदत॥ व्यषीदत॥ अभ्यषीदत ॥१५४॥

अभ्यसीदत॥ छंदस्यृदवग्रहात॥ ऋकारांतादवग्रहात्परस्यनस्यणः॥ नृमणाः पितृयाणं॥ नश्चधातुस्थोरुषुभ्यः॥ धातुस्था

त॥ अग्नेरक्षाणः॥ शिक्षाणोअस्मिन्॥ उरुणस्कृधि॥ अभीषुणः॥ मोषुणः॥ इत्यष्टमः॥ अथस्वरप्रकरणं॥ अनुदा

त्तंपदमेकवर्जं॥ परिभाषेयंस्वरविधिविषया॥ यस्मिन्पदेयस्योदात्तःस्वरितोवाविधीयतेतमेकमवर्जयित्वाशेषंत

त्पदमनुदात्ताचकंस्यात्॥ गोपायतंनः॥ अत्रसनाद्यंताइतिधातुत्वेधातुस्वरेणयकाराकारःउदात्तःशिष्टमनुदात्तं॥ सतिशि

ष्टस्वरबलीयस्त्वमन्यत्रविकरणेभ्यइतिवाच्यं॥ तेनोक्तोदाहरणेगुपेर्धातुस्वरः॥ आयप्रत्ययस्वरश्चनशिष्यते॥ अन्यत्रेतिकिं

यज्ञंयज्ञमभिवृधेगृणीतः॥ अत्रसतिशिष्टेपिश्नाइत्यस्यस्वरोनशिष्यते॥ किंतु॰ सएव॥ अनुदात्तस्यचयत्रोदात्तलो

पः॥ यस्मिन्ननुदात्तेपरेउदात्तोलुप्यतेतस्योदात्तःस्यात्॥ देवीवाचं॥ अत्रङीबुदात्तः॥ चौ॥ लुप्ताकारेंचतौपरेपूर्वस्यांतोदा

त्तः॥ उदात्तनिवृत्तिःस्वरापवादः॥ देवद्रीचीनयतदेवयंतः॥ अतद्धितइतिवाच्यं॥ दाधीचः॥ माधूचः॥ प्रत्ययस्वरएवात्र॥ आमंत्रितस्यच॥

आमंत्रितविभक्त्यंतस्यादिरुदात्तःस्यात्॥ अग्नइंद्रवरुणमित्रदेवाः॥ आमंत्रितस्यच॥ पदात्परस्यापादादिस्थस्यामंत्रितस्यस

र्वस्यानुदात्तःस्यात्॥ प्रागुक्तस्यषाष्ठस्यापवादोयमाष्टमिकः॥ इमंमेगंगेयमुनेसरस्वति॥ अपादादौकिं॥ श्रुतुधिस्तोमं॥ आ

मंत्रितपूर्वमविद्यमानवत्॥ अग्नइंद्र॥ अत्रेंद्रादीनांनिघातोन॥ पूर्वस्याविद्यमानत्वेनपदात्परत्वाभावात॥ नामंत्रितेस

मानाधिकरणेसामान्यवचनं॥ समानाधिकरणेआमंत्रितेपरेविशेष्यंपूर्वमविद्यमानवन्न॥ अग्नेतेजस्विन्॥ अग्नेत्रातः॥ सामा

न्यवचनंकिं॥ पर्यायेषुमाभूत॥ अध्न्येदेविसरस्वति॥ सामान्यवचनंविभाषितंविशेषवचने॥ अत्रभाष्यकृताबहुवचनमि

६

निघ्नरितं सामान्यवचनमिति पूर्वसूत्रे योजितं॥ आमंत्रितांते विशेषणे परे पूर्वं बहुवचनांतमविद्यमानवद्वा॥ देवीः षळुर्वीरुरु नः वै० स्वर०
॥सि०कौ०॥ कृणोत॥ अत्र देवीनां विशेषणं षडिति॥ देवाः शरण्याः॥ इह द्वितीयस्य निघातो वैकल्पिकः॥ सुबामंत्रिते पराङ्गवत्स्वरे॥ सुबंतमा धा
॥१४५॥ मंत्रिते परे परस्यांगवत्स्यात्स्वरे कर्तव्ये॥ द्रवत्पाणी शुभस्पती॥ शुभइति शुभेः क्विबंतात्षष्ठ्यंतं॥ तस्य परशरीरानुप्रवेशे षाष्ठि
कमामंत्रिताद्युदात्तत्वं॥ न चाष्टमिको निघातः शंक्यः॥ पूर्वामंत्रितस्याविद्यमानवत्वेन पादादित्वात्॥ यत्तोदिवो दुहितर्मर्तभोजनं
इह दिवःशब्दस्याष्टमिको निघातः॥ पशुर्नोहश्वन्॥ षष्ठ्यामंत्रितकारकवचनं॥ षष्ठ्यंतमामंत्रितांतं प्रति यत्कारकं तद्वाचकं चे
ति परिगणनं कर्तव्यमित्यर्थः॥ तेनेह न॥ अयमग्ने जरिता॥ एतेनाग्ने ब्रह्मणा॥ समर्थानुवृत्त्या वा सिद्धं॥ पूर्वांगस्चेति व
क्तव्यं॥ आ ते पितर्मरुतां॥ प्रति त्वा दुहितर्दिवः॥ अव्ययानां न॥ उच्चैरधीयान॥ अव्ययीभावस्य त्विष्यते॥ उपाग्न्यधीया
न॥ उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य॥ उदात्तस्थाने स्वरितस्थाने च यो यण् ततः परस्यानुदात्तस्य स्वरितः स्यात्॥ अभ्य ॥१४५॥
भिहि॥ स्वरितयणः॥ खलप्वाशा॥ अस्य स्वरितस्य त्रैपादिकत्वेनासिद्धत्वाच्छेषनिघातो न॥ एकादेश उदात्तेनोदात्तः॥
उदात्तेन सहैकादेश उदात्तः स्यात्॥ वोश्वाः॥ क्वावरं मरुतः॥ स्वरितो वानुदात्ते पदादौ॥ अनुदात्ते पदादौ परे उदात्तेन सहैकादेशः
स्वरितो वा स्यात्॥ पक्षे पूर्वसूत्रेणोदात्तः॥ वी ३ दंज्योतिर्हृदये॥ अस्य श्लोको दिवीयते॥ व्यवस्थितविभाषात्वादिकारयोः स

रितः॥ दीर्घप्रवेशे तूदात्तः॥ किंच॥ एङः पदांतादिति पूर्वरूपे स्वरित एव॥ तेवदन्॥ सोयमागात्॥ उक्तं च प्रातिशाख्ये॥ इकारयोश्च प्र
श्लेषे क्षैप्राभिनिहितेषु चेति॥ उदात्तादनुदात्तस्य स्वरितः॥ उदात्तात्परस्यानुदात्तस्य स्वरितः स्यात्॥ अग्निमीळे॥ अस्याप्यसिद्ध
त्वाच्छेषनिघातेन॥ तमीशानासः॥ नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानां॥ उदात्तपरः स्वरितपरश्चानुदात्तः स्वरितो न स्यात्
गार्ग्यादिमते तु स्यादेव॥ प्रयआरुः॥ वोश्वाः क्वा ३ भीशवः॥ एकश्रुति दूरात्संबुद्धौ॥ दूरात्संबोधने वाक्यमेकश्रुतिः स्यात्॥ त्रै
स्वर्यापवादः॥ आगच्छ भो माणवक॥ यज्ञकर्मण्यजपन्यूंखसामसु॥ यज्ञक्रियायां मंत्र एकश्रुतिः स्याज्जपादीन्वर्जयित्वा॥ अ
ग्निर्मूर्द्धा दिवः॥ यज्ञे किं॥ स्वाध्यायकाले त्रैस्वर्यमेव॥ अजपेतिकिं॥ ममाग्ने वर्चो विहवेष्वस्तु॥ जपो नाम उपांशुप्रयोगः॥ य
थाजले निमग्नस्य॥ न्यूंखा नाम षोडश ओकाराः॥ गीतिषु सामाख्या॥ उच्चैस्तरां वा वषट्कारः॥ यज्ञकर्मणि वौषट्शब्द उच्चै
स्तरां वा स्यादेकश्रुतिर्वा॥ विभाषा छंदसि॥ छंदसि विभाषा एकश्रुतिः स्यात्॥ व्यवस्थितविभाषेयं॥ संहितायां त्रैस्वर्यं
ब्राह्मणे एकश्रुतिर्बह्वृचानां॥ अन्येषामपि यथासंप्रदायं व्यवस्था॥ न सुब्रह्मण्यायां स्वरितस्य तूदात्तः॥ सुब्रह्मण्याख्ये नि
गदे यज्ञकर्मणीति विभाषा छंदसीति च प्राप्ता एकश्रुतिर्न स्यात् स्वरितस्योदात्तश्च स्यात्॥ सुब्रह्मण्यों॥ असावित्यंतः तस्मि

१८ नेव निगदे प्रथमांतस्यांत उदात्तः स्यात्॥ गार्ग्योयजते॥ भित्वा प्रास आद्युदात्तो नेनबाध्यते॥ अमुष्येत्यतः॥ अमुष्यंतस्यापिप्राग षष्ठ्यंत्य
॥ सि॰उ॰॥ वत्॥ दाक्षेःपितायजते॥ स्यांतस्योपोत्तमं चवादूतः॥ तेन द्वावुदात्तौ॥ गार्ग्यस्य पितायजते॥ वानामधेयस्य॥ स्यांतस्य नामधेय वै॰स्व॰सा॰
स्य उपोत्तमउदात्तं वास्यात्॥ देवदत्तस्य पितायजते॥ देवब्राह्मणयोरनुदात्तः॥ अनयोः स्वरितस्यानुदात्तः स्यात्कत्रल्प्यायां
॥२५६॥ देवाब्राह्मणा आगछत॥ स्वरितात्संहितायामनुदात्तानां॥ स्वरितात्परेषामनुदात्तानां संहितायामेकश्रुतिः स्यात्॥ इमं मे
गंगेयमुने सरस्वति॥ उदात्तस्वरितपरस्य सन्नतरः॥ उदात्तस्वरितौ परौ यस्मात्तस्यानुदात्तस्यानुदात्ततरः स्यात्॥ सरस्वति शु
तुद्रि॥ व्यचक्षयत्स्वः॥ तस्य परमाम्रेडितं॥ अनुदात्तं च॥ द्विरुक्तस्य रूपं परं॥ अनुदात्तं स्यात्॥ दिवेदिवे॥ ॥ इति साधार
णस्वराः॥ ॥ धातोः॥ अंत उदात्तः स्यात्॥ गोपायतं नः॥ असि सत्यः॥ स्वपादिर्हिंसामच्यनिटि॥ स्वपादीनां हिंसेश्चानिट्यजादौ
लसार्वधातुके परे॥ आदिरुदात्तो वा स्यात्॥ स्वपादिरदाद्यंतर्गणः॥ स्वपंति॥ श्वसंति॥ हिंसंति॥ पक्षे प्रत्ययस्वरेण मध्योदात्तता॥ ॥२५६॥
ङित्त्वेष्यते॥ नेह॥ स्वपानि॥ हिनसानि॥ अभ्यस्तानामादिः॥ अनिट्यजादौ लसार्वधातुके परे अभ्यस्तानामादिरुदात्तः॥
यद्दतिप्रियावसूः॥ परत्वान्नित्स्वरमयं बाधते॥ दधानाइंद्रे॥ अनुदात्ते च॥ अविद्यमानोदात्ते लसार्वधातुके परेऽभ्यस्तानामा

दिरुदात्तः॥ दधासि रत्नं द्रविणं च दाशुषे॥ भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति॥ भीप्रभृतीनामभ्यस्तानां पि
ति लसार्वधातुके परे प्रत्ययात्पूर्वमुदात्तं स्यात्॥ योऽग्निहोत्रं जुहोति॥ ममत्तु नः परिज्मा॥ माता यद्वीरं दधनत्॥ जागर्षि त्वं॥ लिति
प्रत्ययात्पूर्वमुदात्तं॥ चिकीर्षकः॥ आदिर्णमुल्यन्यतरस्यां॥ अभ्यस्तानामादिरुदात्तो वा स्याण्णमुलि परे॥ लोलूयं लोलूयं॥ प
क्षे लित्स्वरः॥ अचः कर्तृयकि॥ उपदेशेऽजंतानां कर्तृयकि परे आद्युदात्तो वा॥ लूयते केदारः स्वयमेव॥ चङ्यन्यतरस्यां॥ चङंते
धातावुपोत्तममुदात्तं वा॥ मा हि चीकरतां॥ धात्वकार उदात्तः॥ पक्षे॥ तरेचङुदात्तः॥ ॥ इति धातुस्वराः॥ ॥ कर्षात्वतो घञोंत उदात्तः
कर्षतेर्धातोराकारवतश्च घञंतस्यांत उदात्तः स्यात्॥ कर्ष इति शपा निर्देशात्तु दादेराद्युदात्त एव॥ कर्षः पाकः॥ उंछादीनां च॥ अंत
उदात्तः स्यादुंछादिषु॥ युगशब्दो घञंतो गुणो निपात्यते कालविशेषे रथाद्युपकरणे च॥ वैश्वानरः कुशिकेभिर्युगेयुगे॥ अन्यत्र
योगे योगे तवस्तरं॥ भक्षशब्दो घञंतः॥ गावः सोमस्य प्रथमस्य भक्षः॥ उत्तमशश्वत्तमौ वा॥ उदुत्तमं वरुण॥ शश्वत्तममी ना
ळते॥ चतुरः शसि॥ चतुरोंत उदात्तः शसि परे॥ चतुरः कल्पयंतः॥ अचि र इति रादेशस्य पूर्वविधौ स्थानिवत्त्वनिषेधान्नेह॥ चतस्रः
पश्य॥ चतेरुरन्॥ नित्वादाद्युदात्तता॥ सात्युपोत्तमं॥ षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिस्तदंते पदे उपोत्तममुदात्तं स्यात्॥

९ अध्वर्युभिः पंचभिः॥ नवभिर्वाजैर्नवती च सस्मभ्यो जायमानः॥ आदराभिर्विवस्वतः॥ उपो नर्मकिं॥ आपद्भिर्हूयमानः॥ विश्वे बे० स्व० म०
॥सि० उ०॥ देवैस्त्रिभिः॥ ज्ञालिकिं॥ नवानां नवतीनां॥ विभाषाभाषायां॥ उक्तविषये॥ सर्वस्यसुपि॥ सुपि परे सर्वशब्द स्या दिरुदात्तः स्या
त्॥ सर्वेनंदति॥ ञ्नित्यादिर्नित्यं॥ ञिदंतस्य निदंतस्य चादिरुदात्तः स्यात्॥ यस्मिन्विश्वानि पौंस्या॥ पुंसः कर्माणि॥ ब्राह्मणा
॥१५॥ दित्वात् यञ्॥ सुतदधिषनश्चनः॥ चायतेरसुन्॥ चायतेरस्येकह्रस्वश्चेति चकारादसुनो नुडागमः॥ पथिमथोः सर्वनामस्थाने
आदिरुदात्तः स्यात्॥ अयं पंथाः॥ सर्वनामस्थाने किं॥ ज्योतिष्मतः पथो रक्ष॥ उदात्तनिवृत्तिस्वरेणांतोदात्तोयं॥ अंतश्चतवै युग
पत्॥ तवै प्रत्ययांतस्याद्यंतौ युगपदुदात्तौ स्तः॥ दर्पसितवा उ॥ क्षयो निवासे॥ आद्युदात्तः स्यात्॥ स्वेक्षये शुचिव्रत॥ जयः क
रणं॥ करणवाची जयशब्द आद्युदात्तः स्यात्॥ जयत्यनेन जयोश्वः॥ वृषादीनां च॥ आदिरुदात्तः॥ आकृतिगणोयं॥ वाजेभि
र्वाजिनीवती॥ इंद्राणी॥ संज्ञायामुपमाने॥ उपमानशब्दः संज्ञायामाद्युदात्तः॥ चंचेव चंचा॥ कनो लुप्॥ एतदेव ज्ञापय ॥१५॥
ति कचित्स्वरविधौ प्रत्ययलक्षणं नेति संज्ञायां किं॥ अग्निर्माणवकः॥ उपमाने किं॥ चैत्रः॥ निष्ठा च द्व्यजनात्॥ निष्ठां
तस्य द्व्यचः संज्ञायामादिरुदात्तो नत्वाकारः॥ दत्तः॥ द्व्यचः किं॥ चिंतितः॥ अनात् किं॥ त्रातः॥ संज्ञायामित्यनुवृत्तेर्नेह

४ असंज्ञार्थमिदं॰ अन्नसंनसुक्तं॰ आशितः कर्ता॰ कर्तृवाची आशितशब्द आद्युदात्तः ~ ४

कृतं॥ हृतं॥ शुष्कधृष्टौ॥ एतावाद्युदात्तौ स्तः॥ कृषन्नित्फाल आशितं॥ रिक्ते विभाषा॥ रिक्तशब्दे वादिरुदात्तः॥ रिक्तः॥ संज्ञा
यां तु॥ निष्ठा च द्व्यजनादिति नित्यमाद्युदात्तं पूर्वविप्रतिषेधेन॥ जुष्टार्पिते च छंदसि॥ आद्युदात्ते वा स्तः॥ नित्यं मंत्रे॥ एतत्सूत्रेश जुष्टर्देवेति: २
क्यमकर्तुं॥ जुष्टादम्नाः॥ यज्वस्याह्वरर्पितं॥ इत्यादिः पूर्वेणैव सिद्धेः॥ छंदसि पाठस्य व्यवस्थितत्वाद्विपरीतापादनायोगात्॥ नेदिष
स्त्वन नेम॥ कृधियुत्॥ तुर्यं शिन्वानः॥ सचंवातः पवंतां॥ यतोनावः॥ यत्प्रत्ययांतस्य द्व्यच आदिरुदात्तो नावं विना॥ युज्यं त्वस्यां
म्या॥ केमर्ति[illegible]तोऽहं इंद्रीयत॥ ईड[illegible]वंदेरुभ्यांसदुदात्ताण्यतः॥ एषां ण्यदंतानामादिरुदात्तः॥ ईड्यो नूतनैरुत॥ आजुह्वान ई
ड्यो वंद्यश्च॥ शंसनो धदिवार्य॥ उक्थमिंद्राय शंस्यं॥ विभाषा वेण्विंधानयोः॥ आदिरुदात्तः॥ इंधानो अग्निं॥ त्यागरागहास
कुहश्वठ[illegible]क्रथानां॥ आदिरुदात्तो वा॥ आद्यास्त्रयो घञंताः॥ त्रयः परे चजंताः॥ मतोः पूर्वमात्संज्ञायां स्त्रियां॥ मतोः पूर्व आ
कार उदात्तः स्त्रीनाम्नि॥ उदुंबरावती॥ शरावती॥ अंतोवत्याः॥ अवतीशब्दस्यांत उदात्तः॥ वेत्रवती॥ ङीपः पित्वादनुदात्तत्वं प्रा
प्तं॥ इवत्या॥ ईवत्युं तस्यापि प्राग्वत्॥ अहीवती॥ मुनीवती॥ ॥अथ फिट्सूत्राणि॥ ॥फिषोंत उदात्तः॥ प्रातिपदिकं फिट् तस्यांत
उदात्तः स्यात्॥ उच्चैः॥ पा[illegible]टलापालंकांबासागरार्थानां॥ एतदर्थानामंत उदात्तः स्यात्॥ पाटलाफले रुडास्तुरूपापाक

८ । अर्पिताः पीणि नवलाचलासदृशत्वांतोदात्तदर्शनात्॰ पुष्करस्यपत्रांशि॰ आदिरुदात्तः स्यात् ~ ४

२०
॥सि॰कौ॰॥ लेतिपर्यायाः॥ लघावंत इति प्राप्ते॥ अपात्र्ककृत्याधिघातआरेवतआरग्वधेतिपर्यायाः॥ अंबार्थः॥ माता॥ ऊनर्वन्नंतानामित्या वै॰ स्व॰ प्र॰
प्राते द्युदात्तौ॥ सागरः समुद्रः॥ गेहार्थानामस्त्रियां॥ गेहं॥ न बिषयस्येति प्राप्ते॥ अस्त्रियां किं॥ शाला॥ आद्युदात्तोयं॥ इहैव पर्युदासा
॥१५९॥ ज्ज्ञापकात्॥ गुदस्य च॥ अंतउदात्तः स्यान्न तु स्त्रियां॥ गुदं॥ अस्त्रियां किं॥ आंत्रेभ्यस्ते गुदाभ्यः॥ स्वांगशिटामदंतानामित्यंतरंग
मायुदात्तत्वं ततष्टाप्॥ ध्यपूर्वस्य स्त्रीविषयस्य॥ धकारयकारपूर्वो योऽकारः सोन्तउदात्तः॥ अंतर्द्धी॥ स्त्रीविषयवर्ण॥ नाम्नामिति प्रा
प्ते॥ छाया॥ माया॥ जाया॥ यांतस्यांत्यात्पूर्वमित्याद्युदात्ते प्राप्ते॥ स्त्रीति किं॥ बाह्यं॥ यभंतत्वादाद्युदात्तं॥ विषयग्रहणं किं॥ इ
भ्या॥ क्षत्रिया॥ यतोनाव इत्याद्युदात्त इभ्यशब्दः॥ क्षत्रियशब्दस्तु यांतस्यांत्यात्पूर्वमिति मध्योदात्तः॥ खांतस्याश्मादेः॥
नखं॥ सुखं॥ दुःखं॥ उखा॥ नखस्य स्वांगशिटामित्याद्युदात्ते प्राप्ते॥ उखा नाम भांडविशेषः॥ तस्य कृत्रिमत्वात् खय्युवर्णं कृ
त्रिमाख्या चेदित्युवर्णस्य उदात्तत्वे प्राप्ते॥ सुखदुःखयोर्नविषयस्येति प्राप्ते॥ अश्मादेः किं॥ शिखा॥ मुखं॥ मुखस्य स्वांगशि ॥१५९॥
टामिति न विषयस्येति वा आद्युदात्तत्वं॥ शिखायास्तु शीङः खो निक्ह्रस्वश्चेति उणादिषु नित्त्वोक्तेः॥ अंतरंगत्वात् टापः
प्रागेव स्वांगशिटामिति वा बोध्यं॥ हिष्ठवत्सरतिशत्थांतानां॥ एषामंत उदात्तः स्यात्॥ अतिशायनेवकुलो वंहिष्ठः॥ नित्त्वा

नित्त्वादाद्युदात्ते प्राप्ते॥ वंहिष्ठैरश्वैः सुवृता रथेन॥ यद्वंहिष्ठं नातिविधे इत्यादौ व्यत्ययादाद्युदात्तः॥ संवत्सरं॥ व्यत्ययपूर्वपदप्रकृति
स्वरोत्र बाध्यत इत्याहुः॥ सप्तति॥ अशीतिः॥ लघावंत इति प्राप्ते॥ चत्वारिंशत्॥ इहापि प्राग्वत्॥ अभ्यूर्णवाना प्रभृथस्यायोः॥ अव्य
यपूर्वपदप्रकृतिस्वरोत्र बाध्यत इत्याहुः॥ यथादिसूत्रेण गतार्थमेतत्॥ दक्षिणस्य साधौ॥ अंतउदात्तः॥ साधुवाचित्वाभावे तु व्यवस्था
यां सर्वनामतया स्वांगशिटामित्याद्युदात्तः॥ अर्थांतरे तु लघावंत इति गुरुरुदात्तः॥ दक्षिणः सरलोदारपरछंदानुवर्तिषु इति
कोशः॥ स्वांगाख्यायामादिर्वा॥ इह दक्षिणस्याद्यंतौ पर्यायेणोदात्तौ स्तः॥ दक्षिणो बाहुः॥ आख्याग्रहणं किं॥ प्रत्यङ्मुखस्या
सीनस्य वामपाणिर्दक्षिणो भवति॥ छंदसि च॥ अस्वांगार्थमिदं॥ दक्षिणः॥ इह पर्यायेणाद्यंतावुदात्तौ॥ कृष्णस्यामृगा
ख्या चेत्॥ वर्णानां तणेत्याद्युदात्ते प्राप्तेऽन्तोदात्तो विधीयते॥ कृष्णानां व्रीहीणां॥ कृष्णो नोनाव वृषभः॥ मृगाख्यायां तु कृ
ष्णो रात्र्यै॥ वा नामधेयस्य॥ कृष्णस्येत्येव॥ अयं वां कृष्णो अश्विना॥ कृष्णऋषिः॥ शुक्लगौरयोरादिः॥ नित्यमुदात्तः स्यादि
त्येके॥ वेत्यनुवृत्तेरिति तु युक्तं॥ सरो गौरो यथा पिबेत्यत्रांतोदात्तदर्शनात्॥ अंगुष्ठोदकबकवशानां छंदस्यंतः॥ अंगुष्ठस्य
स्वांगानामकुर्वादीनामिति द्वितीयस्योदात्तत्वे प्राप्ते अंतोदात्तार्थ आरंभः॥ वशाग्रहणं नियमार्थं छंदस्येवेति॥ तेन लोके आद्युदा

२१ नतेस्याङ्कः॥पृष्ठस्य च॥छंदस्यंतउदात्तस्याद्वा भाषायां॥पृष्ठं॥अर्जुनस्य तृणाख्या चेत्॥उनर्वअंतानामित्याद्युदात्तस्याप वै॰स्व॰फि॰
॥सि॰कौ॰॥ वादः॥अर्यस्य स्वाम्याख्या चेत्॥यांतस्यांत्यात्पूर्वमिति यतो नाव इति वाद्युदात्ते प्राप्ते वचनं॥आशाया अदिगाख्या चेत्॥दि
गाख्या न्या इत्यर्थमिदं॥अत एव ज्ञापकादिक्पर्यायस्याद्युदात्तता॥इंद्र आशाभ्यस्परि॥नक्षत्राणामाब्विषयाणां॥अंतउदा
॥२४२॥ त्तः स्यात्॥आश्लेषानुराधादीनां लयावंतमिति प्राप्ते॥ज्येष्ठाश्रविष्ठाधनिष्ठानामिष्ठन्नंतत्वेनाद्युदात्ते प्राप्ते वचनं॥न कुपूर्वस्य
कृत्तिकाख्या चेत्॥अंतउदात्तो न॥कृत्तिका नक्षत्रं॥केचित्तु कुपूर्वाय आब्विषयाणामिति व्याख्याय आर्यिका बहुलिका इत्यत्रा
प्यंतोदात्तो नेत्याहुः॥घृतादीनां च॥अंतउदात्तः॥घृतं मिमिक्षे॥आकृतिगणोयं॥ज्येष्ठकनिष्ठयोर्वयसि॥अंतउदात्तः॥ज्येष्ठआ
इ चमसा॥कनिष्ठ आह चतुरः॥वयसि किं॥ज्येष्ठः श्रेष्ठः कनिष्ठोल्पिष्ठः॥इष्ठन्नित्वादाद्युदात्त एव॥बिल्वतिष्ययोः स्वरितो वा
अनयोरंतः स्वरितो वा स्यात्॥पक्षे उदात्तः॥ ॥इति फिट्सूत्रेषु प्रथमः पादः॥ ॥अथादिः प्राक्शकटेः॥अधिकारोयं॥शकटि ॥२४३॥
शकट्योरिति यावत्॥ह्रस्वांतस्य स्त्रीविषयस्य॥आदिरुदात्तः स्यात्॥वलिः तनुः॥नविषयस्यानिसंतस्य वनेन वायः॥इसं
तस्य तु सर्पिः॥नप्रपुंसकं॥तृणधान्यानां च द्व्यषां॥द्व्यचामित्यर्थः॥कुशाः॥काशाः॥माषाः॥तिलाः॥बहुचां तु गोधूमाः॥त्रः सं
ख्यायाः॥पंच॥चत्वारः॥स्वांगशिटामदंतानां॥शिट् सर्वनाम॥कर्णाभ्यां चुबुकादधि॥ओष्ठाविव मधु॥शिरो विहायाः॥प्रा

णिनां कुपूर्वं॥कवर्गात्पूर्व आदिरुदात्तः॥काकः॥वृकः॥शुकेषु मे॥खय्युवर्णं कृत्रिमाख्या चेत्॥खयि परे उवर्णमुदात्तं स्यात्॥कंदुकः
उनर्वन्नंतानां॥उनः वरुणं वो रिशादसं॥र्वः॥स्वसारं त्वा कृणवै॥नः॥पीवानं मेषं॥वर्णानां तणतिनितांतानां॥आदिरुदात्तः॥ए
तः॥हरिणः॥शितिः॥पृश्निः॥हरित्॥ह्रस्वांतस्य ह्रस्वमनृत्ताच्छील्ये॥सवर्ज्यं ह्रस्वांतस्यादिभूतं ह्रस्वमुदात्तं स्यात्॥निघ्नं॥अक्ष वर्जमितवर्जपिता
स्यादेवनस्य॥आदिरुदात्तः॥तस्य नाक्षः॥देवने तु॥अक्षैर्मा दीव्यः॥अर्धस्यासमद्योतने॥अर्धो ग्रामस्य॥समेंशे तु॥अर्द्ध
पिप्पल्याः॥पीतद्वर्थानां॥आदिरुदात्तः॥पीतद्रुः॥ग्रामादीनां च॥ग्रामः॥सोमः॥यामः॥लुबंतस्योपमेयनामधेयस्य॥चंचेव चंचा
स्तु गतस्येति पाठांतरं॥स्फिगि निलुप च स्पाचां संज्ञा॥नह्यक्षपर्वतविशेषव्याघ्रसिंहमहिषाणां॥एषामुपमेयनाम्नामादिरुदा
त्तो न॥ताल इव तालः॥मेरुरिव मेरुः॥व्याघ्रः॥सिंहः॥महिषः॥राजविशेषस्य यमन्वा चेत्॥यमन्वा हि वृत्र॥आंगउदाहरणं॥
ह्रस्वे अंगाः॥मस्तदाहरणं॥लघावंते द्वयोश्च ब[illegible] गुरुः॥अंते लघौ द्वयोश्च बह्वोः सतो ब[illegible]स्य गुरुरुदात्तः॥कल्याणः ह्रस्वक
कोलाहलः॥स्त्रीविषयवर्णाक्षुपूर्वाणां॥एषां त्रयाणामाद्युदात्तः॥स्त्रीविषय मल्लिका॥वर्ण॥श्येनी॥हरिणी॥अक्षशब्दा
त्पूर्वोस्त्येषां ते अक्षुपूर्वाः॥तरक्षुः॥शकुनीनां च लघुपूर्वं॥पूर्वं लघु उदात्तं स्यात्॥कुक्कुटः॥तित्तिरिः॥नर्तु प्राण्याख्यायां

२२

।।सि०उ०।। यथालक्षणं प्राप्तमुदात्तत्वं न।। वसंतः।। कृकलासः।। धान्यानां च वृद्धिक्षांतानां।। आदिरुदात्तः।। कांतानां।। श्यामाकाः।। षांतानां वै०स्व०फि०
माषाः।। जनपदशब्दानामषांतानां।। केकयः।। हयादीनामसंयुक्तलांतानामंतः पूर्वं वा।। इत्यतिदृपःसंज्ञा।। पललं।। हयादीनां शललं
।।१५०।। किं।। एकलः।। असंयुक्तेति किं।। मल्लः।। इगंतानां च द्व्यषां।। आदिरुदात्तः।। कृषिः।। ।।इति द्वितीयः पादः।। ।।अथ द्विती
यं प्राग्बाषात्।। ईषांतस्य हयादेरित्यतः प्राक् द्वितीयाधिकारः।। त्र्यषां प्राङ्मकरात्।। मकरवरूढ इत्यतः प्राक् त्र्यचामि
त्यधिकारः।। स्वांगानामकुर्वादीनां।। कवर्गरेफवकारादीनि वर्जयित्वा त्र्यचां स्वांगानां द्वितीयमुदात्तं।। ललाटं।। कुर्वादी
नां तु।। कपोलः।। रसना।। वदनो।। मादीनां च।। मलयः।। मकरः।। शादीनां।। शाकानां।। शीतन्या।। शतपुष्पा।। पांतानां गुर्वादी
त नां।। पादपः।। आतपः।। लघ्वादीनां तु।। अनूपः।। युतांतु।। नीपं।। युतान्यणंतानां।। युतं।। अयुतं।। अनिः।। धमनिः।। अणि वि
पणिः।। मकरवरूढपारेवतवितस्तेक्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्ठाकाशीनामादिर्वा।। एषामादिर्द्वितीयो वोदात्तः।। १५०
मकरवरूढ इति छांदसित्व।। अमकराद्यर्थआरंभः।। लक्ष्यानुसाराद्वादिर्द्वितीयं वोदात्तं ज्ञेयं।। कर्दमादीनां च।। आदिर्द्वितीयो
वोदात्तः।। सुगंधितेजनस्य ते वा।। आदिर्द्वितीयं ते शब्दश्चेति त्रयः पर्यायेणोदात्ताः।। सुगंधितेजनाः २।। नपः फलांतानां।। आदि
र:२ ते

द्वितीयं वोदात्तं।। राजादनफलं।। यांतस्यांत्यात्पूर्वं।। कुलायः।। थांतस्य च नालघुनी।। नाशब्दो लघु च उदात्ते स्तः।। सनाथा सभा।। शि
शुमारोदुंबरबलीवर्दोष्ट्रारपुरूरवसां च।। अंत्यात्पूर्वमुदात्तो द्वितीयं वा।। सांकाश्यकांपिल्यनासिक्यदार्वाघाटानां।। द्वि
ला तीयमुदात्तं वा।। ईषांतस्य हयादेरादिर्वा।। हलीषा।। लांगलीषा।। उशीरदाशेरकपालपुसालशैवालश्यामाकशारीरश
रावहृदयहिरण्यारण्यापत्यदेवराणां।। एषामादिरुदात्तः स्यात्।। महिष्याषाढयोर्जायेष्टकाख्या चेत्।। आदिरुदात्तः
महिषी।। जाया।। आषाढा उपदधाति।। ।।इति तृतीयः पादः।। ।।शकटिशकट्योरक्षरमक्षरं पर्यायेण।। उदात्तं शकटिः
२।। शकटी २।। गोष्ठजस्य ब्राह्मणनामधेयस्य।। अक्षरमक्षरं पर्यायेणोदात्तं।। गोष्ठजः।। ब्राह्मणः।। अन्यत्र गोष्ठजः प
शुः।। कृदुत्तरपदप्रकृतिस्वरेणांतोदात्तः।। पारावतस्योपोत्तमवर्जं।। शेषं क्रमेणोदात्तं।। पारावतः।। धूम्रजानुमुंजके
शकालवालस्थालीपाकानामधूजलस्थानां।। एषां चतुर्णां धूम्रप्रभृतीनां चतुरो वर्जयित्वा शिष्टानि क्रमेण उदात्तानि।।
धूम्रजानुः।। मुंजकेशः।। कालवालः।। स्थालीपाकः २।। कपिकेशहरिकेशयोश्छंदसि।। कपिकेशः।। हरिकेशः।। न्यङ् स्वरौ
स्वरितौ।। स्पष्टं।। न्यङ् नोनः।। व्यचक्षपत्क्त्वः।। न्यर्बुदव्यल्कशयोरादिः स्वरितः स्यात्।। न्यर्बुदाय स्वः।। पाकदूर्वा व्यल्कशा
उ

२२
॥सि॰कु॰॥ तिल्यशिक्यकार्म्मर्यधान्यकन्याराजन्यमनुष्याणामंतः स्वरितः स्यात्॥ तिलानां भवनं क्षेत्रं तिल्यं॥ यतो नावः इति प्राप्ते॥ शि वै॰स्व॰फि॰८
क्यमभ्युपदधाति॥ कार्म्मर्यमपश्यन्॥ धान्यमसि धिनुहि॥ पावीरवी कन्या॥ राजन्यो बन्नस्य रूपं॥ प्रतीचीं मनुष्याः॥ बिल्वभ
॥१५१॥ क्ष्यवीर्याणि छंदसि॥ अंतः स्वरितानि॥ ततो बिल्व उदतिष्ठत्॥ बलं विरुजवीर्यं॥ त्वत्वाहुमसि मेत्यनुशानि॥ स्तरीरुत्वद्व॥
उतत्वः पश्यन्॥ नभंतामन्यके समे॥ सिमस्य॥ सिमस्याथर्वणे अंत उदात्तः॥ आथर्वणग्रहणं प्रायिकं॥ तत्रहस्यस्यैवं परं वा॥
तेन वासत्त नुते सिमस्मै॥ इत्यृग्वेदेपि भवत्येव॥ निपाता आद्युदात्ताः॥ स्वाहा॥ उपसर्गाश्चाभिवर्जं॥ एवादीनामंतः॥ ए
वमादीनामिति पाठांतरं॥ एव॥ एवं॥ नूनं॥ सह॥ ते पुत्र सूरिभिः सह॥ सहस्य स इति प्रकरणे सहशब्द आद्युदात्त इति तु प्राचः
तच्चिंत्यं॥ वावादीनामुभावुदात्तौ॥ उभौ ग्रहणमनुदात्तं पदमेकवर्जमित्यस्य बाधाय॥ वाद्योनुदात्ताः॥ स्पष्टं॥ यथेति पा
दांते॥ तं नेमिमृभवो यथा॥ पादांते किं॥ यथा नो अदितिः करत्॥ प्रकारादिद्विरुक्तौ परस्य अंत उदात्तः॥ पटुपटु॥ शेषं सर्वम
नुदात्तं॥ शेषभिन्नाद्विरुक्तस्य परमित्यर्थः॥ प्रप्रायं॥ दिवे दिवे॥ ॥इति शांतनवाचार्यप्रणीतेषु फिट्सूत्रेषु तुरीयः पादः॥ ॥१५१॥
॥ ॥आद्युदात्तश्च॥ प्रत्यय आद्युदात्तः स्यात्॥ अग्निः कर्त्तव्यं॥ अनुदात्तौ सुप्पितौ॥ पूर्वस्यापवादः॥ यज्ञस्य॥ नयो

युवनि॥ शप्प्रतिपोरनुदात्तत्वे स्वरितप्रचयो॥ चितः॥ अंत उदात्तः॥ चितः सप्रकृतेर्बह्वकजर्थं॥ चितिप्रत्यये सति प्रकृतिप्रत्ययस
मुदायस्यांत उदात्तो वाच्य इत्यर्थः॥ नभंतामन्यके समे॥ यके सरस्वती॥ तकत्सकते॥ तद्धितस्य॥ चितस्तद्धितस्यांत उदात्तः॥ पूर्वे
णासिद्धे नित्स्वरबाधनार्थमिदं॥ कौंजायनाः॥ कितः॥ कितस्तद्धितस्यांत उदात्तः॥ यदाग्नेयः॥ तिसृभ्यो जसः॥ अंत उदात्तः॥ ति
स्रो द्यावः सवितुः॥ सावेकाचस्तृतीयादिर्विभक्तिः॥ सुः सप्तमीबहुवचनं॥ तत्र य एकाच् ततः परा तृतीयादिर्विभक्तिरुदात्ता॥ वाचा
विरूप॥ सौ किं॥ राजेत्यादौ एकाचोपि राजशब्दात्परस्य माभूत्॥ राज्ञोनुते विधते राजनि ते॥ तृतीयादिः किं॥ न ददर्श वाचं॥ अं
तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे॥ नित्याधिकारविहितसमासादन्यत्र यदुत्तरपदमंतोदात्तमेकाच् ततः परा तृती
यादिर्विभक्तिरंतोदात्ता वा स्यात्॥ परमवाचा॥ अंचेश्छंदस्यसर्वनामस्थानं॥ अंचेः परा विभक्तिरुदात्ता॥ इंद्रो दधीचः॥ चावि
ति पूर्वपदांतोदात्तत्वं प्राप्तं॥ तृतीयादिरित्यनुवर्त्तमाने सर्वनामस्थानग्रहणं शस्परिग्रहार्थं॥ प्रतीचो बाहून्॥ ऊडिदंपदाद्यप्पु
मैद्युभ्यः॥ एभ्यो सर्वनामस्थानं विभक्तिरुदात्ता॥ प्रष्ठौहः॥ प्रष्ठौहा॥ ऊठ्युपधाग्रहणं कर्त्तव्यं॥ इह मा भूत्॥ अक्षद्युवा॥ अक्ष
द्युवे॥ इदं॥ एभिर्नृभिर्नृतमः॥ अन्वादेशे न॥ अंतोदात्तादित्यनुवृत्तेः॥ न चेतत्रांतोदात्तताप्यस्तीति वाच्यं॥ इदमोन्वादेशे
प्रकृतिरस्तीति

२४

॥सि०कौ०॥ शनुदात्तस्तृतीयादाविति सूत्रेणानुदात्तस्य अशोविधानात्॥ प्रतेबध्नः॥ माभ्यांगा अनु॥ पद्भिर्नो मासृद्भिरः इति पद्दृपदादयः ६० स्व० सना०
पद्भ्याम्भूमिः॥ दद्भिर्नजिह्वा॥ नसोःप्राणः॥ जायते मासिमासि॥ मनश्चिन्मेहृदआ॥ अप॥ अपांफेनेन॥ पुम॥ अथ्यातेवपुंसः॥
॥१६२॥ रै॥ रायावयं॥ रायो धुर्त्तो॥ दिव॥ दिवेदिवे॥ अष्टनोदीर्घात्॥ शसादिर्विभक्तिरुदात्ता॥ अष्टाभिर्दशभिः॥ शतुरनुमोनद्यजादी॥
अनुमयः शतृप्रत्ययस्तदंतादंतोदात्तात्परानदीअजादिश्च शसादिर्विभक्तिरुदात्तास्यात्॥ अच्छारवंप्रथमाजानतीगात
कृण्वते॥ अंतोदात्तात्किं॥ दधती॥ अस्यस्तानामादिरित्याद्युदात्तः॥ अनुमःकिं॥ तुदंती॥ एकादेशोत्रउदात्तः॥ अडुपदेशात्प
रत्वात्शतुर्लसार्वधातुकइतिनिघातः॥ उदात्तयणोहल्पूर्वात्॥ उदात्तस्थानेयोयण्हल्पूर्वस्तस्मात्परानदीशसादिर्विभक्ति
श्चउदात्तास्यात्॥ चोदयित्रीसूनृतानां॥ एषानेत्री॥ अतेंदेवायकृण्वतेसवित्रे॥ नोङ्धात्वोः॥ अनयोर्यणः परेशसादय ॥१६२॥
उदात्तानस्युः॥ ब्रह्मबंध्वा॥ सेतृभिःक्षीवे॥ हृस्वनुड्भ्यांमतुप्॥ हृस्वांतादंतोदात्तात् नुटश्चपरोमतुबुदात्तः॥ योअब्दि
मॉ उदनिमा ँ इयर्त्ति॥ नुटः॥ अक्षण्वंतः॥ अंतोदात्तात्किं॥ मात्वाविदद्दिषुमान्॥ स्वरविधौव्यंजनमविद्यमानवदित्यतद्

चतुर्भिःसाकं २

वनेष्यते॥ मरुत्वांइंद्र॥ नियुत्वान्वायवागहि॥ रेशब्दाच्च॥ रेवांइद्रेवतः॥ नामन्यतरस्यां॥ मतुपियोहृस्वस्तदंतादंतोदात्तात्प रो
नामुदात्तोवा॥ चेतंतीसुमतीनां॥ ङ्याश्छंदसि॥ ङ्याः परोनामुदात्तोवा॥ देवसेनानामभिभंजतीनां॥ वेत्यनुवर्त्तनेर्ह॥ जयंतीनां
मरुतोयंतु॥ षट्त्रिचतुर्भ्योहलादिः॥ एभ्योहलादिर्विभक्तिरुदात्ता॥ आषड्भिर्हूयमानः॥ त्रिभिष्ट्वंदेव॥ चतुर्णां॥ नगोश्व
न्साववर्णराडङ्क्रुङ्कृद्भ्यः॥ एभ्यःप्रागुक्तंन॥ गवांशता॥ गोभ्योगातुं॥ शुनश्चिच्छेपं॥ सौप्रथमैकवचने अवर्णतात्प्रते
भ्योयकत्वं॥ तेषांपादिश्रधीहवं॥ दिवोश्रत॥ दिवःपराश्सलादिर्विभक्तिर्नोदात्ता॥ नृभिर्येमानः॥ तित्स्वरितं॥ निगदव्या
ख्यातं॥ कर्त्तनं॥ तास्यनुदात्तेत्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः॥ अस्मात्परंलसार्वधातुकमनुदात्तंस्या ङि ३
प्रत्ययस्वरापवादोयम् त्॥ तासिः कर्त्ता॥ अनुदात्तेत्॥ यआस्ते॥ ङित्॥ अभिचष्टे॥ अन्तेभिः॥ अदुपदेशात्॥ पुरुकृजारनस्यते॥ चित्स्वरोप्य
नेनबाध्यते॥ वर्धमानंस्वेदमे॥ तास्यादिभ्यःकिं॥ अभिहव्यग्रणीतः॥ उपदेशग्रहणान्नेह॥ हतोहत्राण्यार्यो॥ लग्रहणंकिं॥
कर्त्ताहनिघ्नानाः॥ सार्वेतिकिं॥ शिश्ये॥ अह्न्विङोःकिं॥ क्नुते॥ यदधीते॥ विदांधियस्विदिभ्यो नेतिवक्तव्यं॥ ईष्टेराजा॥ एतश्चत

×ह्नुमिरक्तुभिः॥ प्रतितिकिं॥ उपवामेदवोदेवे॥ नचान्यतरस्यां॥ नुःपरात्सलादिर्विभक्तिर्वोदात्ता ५॥

२५
॥सि०कौ०॥ दात्तस्य च यत्रेति सूत्रे भाष्ये स्थितं ॥ आदिः सिचोन्यतरस्यां ॥ सिजंतस्यादिरुदात्तो वा ॥ यासिष्टं वर्त्तिरश्विनौ ॥ थलि च सेटीडंतो
वा ॥ सेटि थलंते पदे इडुदात्त अंतो वा आदिर्वा ॥ यदा नैते त्रयस्तदा लिति ॥ तिप्रत्ययात्पूर्वमुदात्तं ॥ चुक्रुविथ ॥ अत्र वलादेरपि प वै०स्व० स०
॥१५३॥ र्यायेणोदात्ता ॥ उपोत्तमं रिति ॥ रित्प्रत्ययांतस्योपोत्तममुदात्तं स्यात् ॥ यदाहवनीये ॥ इति प्रत्ययस्वराः ॥ समासस्य ॥ अंतउ स
यो दात्तः ॥ यज्ञश्रियं ॥ बहुव्रीहौ प्रकृत्या पूर्वपदं ॥ उदात्तस्वरितयोर्योगि पूर्वपदं प्रकृत्या स्यात् ॥ सत्यश्चित्रश्रवस्तमः ॥ उदात्तेत्यादि
किं ॥ सर्वानुदात्ते पूर्वपदे समासांतोदात्तत्वमेव यथा स्यात् ॥ समपादः ॥ तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीया
कृत्याः ॥ तुल्यश्वेतः ॥ कृत्यतुल्याख्या अजात्येति तत्पुरुषः ॥ किरिणा काणः किरिणः ॥ पतयन्मंदयत्सखं ॥ मंदयति मादके इंद्र का
न्वं सखेति सप्तमीतत्पुरुषः ॥ शस्त्रीश्यामा ॥ अ[illegible]यन नञ्कुनिपातानां ॥ अयज्ञो वा एष सः ॥ परिगणनं किं ॥ स्नात्वाकालकः ॥ मुहूर्त्त एवः
सुखं ॥ भोज्योष्णं ॥ वर्णो वर्णेष्वनेते ॥ वर्णवाचिन्युत्तरपदे एनवर्जिते वर्णवाचि पूर्वपदं प्रकृत्या तत्पुरुषे ॥ कृष्णसारंगः ॥ लोहि ॥१५३॥
तकल्माषः ॥ कृष्णशब्दो नक्प्रत्ययांतः ॥ लोहितशब्द इतन्नंतः ॥ वर्णः किं ॥ परमकृष्णः ॥ वर्णेषु किं ॥ कृष्णतिलाः ॥ अनेते
इति किं ॥ कृष्णैतः ॥ गाधलवणयोः प्रमाणे ॥ एतयोरुत्तरपदयोः प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या ॥ अरित्रगाध
॥सप्तैते पूर्वपदस्तात्तत्पुरुषे प्रकृत्या॥

मुदकं ॥ तत्प्रमाणमित्यर्थः ॥ गोलवणं ॥ यावद्गवे दीयते तावदित्यर्थः ॥ अरित्रशब्द इत्रांतो मध्योदात्तः ॥ प्रमाणं इयत्तापरिच्छेदमा
त्रं ॥ न पुनरायाम एव ॥ प्रमाणे किं ॥ परमगाधं ॥ दायाद्यं दायादे ॥ तत्पुरुषे प्रकृत्या ॥ धनदायादः ॥ धनशब्दः क्युप्रत्ययांतः ॥ प्र
त्ययस्वरेणाद्युदात्तः ॥ दायाद्ये किं ॥ परमदायादः ॥ प्रतिबंधि चिरकृच्छ्रयोः ॥ प्रतिबंधिवाचि पूर्वपदं प्रकृत्या ॥ एतयोः परतस्तत्पुरुषे
गमनचिरं ॥ व्याहरणकृच्छ्रं ॥ गमनं कारणविकलतया चिरकालभावि कृच्छ्रयोगि वा प्रतिबंधि जायते ॥ प्रतिबंधीति किं ॥ मू
त्रकृच्छ्रं ॥ पदेपदेशे ॥ व्याजवाचिनि पदशब्दे उत्तरपदे पूर्वपदं प्रकृत्या तत्पुरुषे ॥ मूत्रपदेन प्रस्थितः ॥ उच्चारपदेन प्रस्थितः
मूत्रशब्दो घञंतः ॥ उच्चारशब्दो घञंतस्थाथादिस्वरेणांतोदात्तः ॥ अपदेशे किं ॥ विष्णुपदं ॥ निवाते वातत्राणे ॥ निवातशब्दे
परे वातत्राणवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या ॥ कुटीनिवातं ॥ कुड्यनिवातं ॥ कुटीशब्दो गौरादिङीषंतः ॥ कुड्यशब्दो ड्यगं
य तः ॥ अन्वंत इत्यन्ये ॥ वातत्राणे किं ॥ राज्ञो निवाते वसति ॥ निवातशब्दोयं रूढः पार्श्वे ॥ शारदे नार्त्तवे ॥ ऋतौ भवमार्त्तवं तद
न्यवाचिनि शारदशब्दे परे तत्पुरुषे पूर्वपदं प्रकृतिस्वरं स्यात् ॥ रज्जुशारदमुदकं ॥ शारदशब्दो नूतनार्थः ॥ तस्याः स्वपदवि
ग्रहः ॥ रज्जोः सद्य उद्धृतं ॥ रज्जुशब्दः सृजेरसुम्वेत्याद्युदात्तो व्युत्पादितः ॥ अनार्त्तवे किं ॥ उत्तमशारदं ॥ अध्वर्युकषाययो

२८

नौतौ॥ एतयोः परतो जातिवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरं॥ कठाध्वर्युः॥ दौवारिककासायं॥ कठशब्दः पचाद्यजंतः तस्मा ष०स्व०सना०
॥सि०३०॥ द्वैशंपायनांतेवासिभ्यश्चेति णिनिः कठचरकाल्लुक इति लुक॥ द्वारेति निर्युक्तः इति ठंदं क्यतोदात्तः॥ जातौ किं॥ परमाध्वर्युः॥ ठ
॥१९४॥ दृश प्रतिरूपयोः सादृश्य॥ अनयोः पूर्वं प्रकृत्या॥ पितृसदृशः॥ सादृश्ये किं॥ परमसदृशः॥ समासार्थोत्र पूज्यमानतान
सादृश्ये॥ द्विगौ प्रमाणे॥ द्विगावुत्तरपदे प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरं॥ प्राच्यसप्तसमः॥ सप्तसमाः प्रमाण
मस्य॥ प्रमाणे लो द्विगोर्नित्यमिति मात्रचो लुक॥ प्राच्यशब्दः आद्युदात्तः॥ प्राच्यश्चासौ सप्तसमश्च प्राच्यसप्तसमः॥ द्विगौ
गंतव्यपण्यं किं॥ व्रीहिप्रस्थः॥ प्रमाणे किं॥ परमसप्तसमः॥ [illegible] वाणिजे॥ वाणिजशब्दे परे तत्पुरुषे गंतव्यवाचि पण्यवाचि
च पूर्वपदं प्रकृतिस्वरं॥ मद्रवाणिजः॥ गोवाणिजः॥ सप्तमी समासः॥ मद्रशब्दो रक्प्रत्ययांतः॥ गंतव्येति किं॥ परमवाणिजः॥
मात्रोपज्ञोपक्रमच्छाये नपुंसके॥ मात्रादिषु परतो नपुंसकवाचिनि तत्पुरुषे तथा॥ भिक्षायास्तुल्यप्रमाणं भिक्षामात्रं॥ भिक्षा ॥१९४॥
शब्दो गुरोश्च हलः इत्यप्रत्ययांतः॥ पाणिन्युपज्ञं॥ पाणिनिशब्द आद्युदात्तः॥ नंदोपक्रमं॥ नंदशब्दः पचाद्यजंतः॥ इषुच्छा
यां आद्युदात्तो नित्वात्॥ नपुंसके किं॥ कुड्यच्छाया॥ सुखप्रिययोर्हिते॥ एतयोः परयोर्हितवाचिनि तत्पुरुषे तथा॥ गमने
दृषुराह

स्करवं॥ गमनप्रियं॥ गमनशब्दो लित्स्वरः॥ हिते किं॥ परमस्करवं॥ प्रीतौ च॥ प्रीतौ गम्यायां प्रागुक्तं॥ ब्राह्मणस्करवं पायसं॥ छात्रप्रियो
नध्यायः॥ ब्राह्मणछात्रशब्दौ प्रत्ययस्वरेणांतोदात्तौ॥ प्रीतौ किं॥ राजस्करवं॥ स्वं स्वामिनि॥ स्वामिशब्दे परे स्ववाचि पूर्वपदं तथा॥
गोस्वामी॥ स्वे किं॥ परमस्वामी॥ पत्यावैश्वर्ये॥ दमूनागृहपतिर्दमे॥ नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या... पतिशब्दे परे ऐश्वर्यवाचिनि तत्पुरुषे
नेतानि प्रकृत्या॥ भुवःपतिः॥ भूपतिः॥ वाक्पतिः॥ चित्पतिः॥ दिधिषूपतिः॥ वा भुवनं॥ उक्तविषये॥ भुवनपतिः॥ भूसूधूभ्रस्जि
भ्यश्छंदसि क्युन्नंतो भुवनशब्दः॥ आशंकाबाधनेदीयःसु संभावने॥ अस्तित्वाध्यवसायः संभावनं॥ गमनाशंक मस्ति २॥ गमनाबाधं
गमनेदीयः॥ गमनमाशंक्यते आबाध्यते [illegible] निकटतरमिति वा संभाव्यते॥ संभावने किं॥ परमनेदीयः॥ पूर्वे भूतपूर्वे॥
आढ्यो भूतपूर्वो आढ्यपूर्वः॥ पूर्वशब्दो वृत्तिविषये भूतपूर्वे वर्त्तते॥ भूतपूर्वे किं॥ परमपूर्वः॥ सविधसनीडसमर्यादसवे
शसदेशेषु सामीप्ये॥ एषु पूर्वं प्रकृत्या॥ मद्रसविधं॥ गांधारिसनीडं॥ काश्मीरसमर्यादं॥ मद्रसवेशं॥ मद्रसदेशं॥ सामीप्ये किं॥ मंत्र
सहमर्यादया समर्यादं क्षेत्रं॥ चैत्रसमर्यादं॥ विस्पष्टादीनि गुणवचनेषु॥ विस्पष्टकटुकं॥ विस्पष्टशब्दो गतिरनंतर
इत्याद्युदात्तः॥ विस्पष्टेति किं॥ परमलवणं॥ गुणेति किं॥ विस्पष्टब्राह्मणः॥ विस्पष्ट विचित्र व्यक्त संपन्न पंडित कुशल

२८
चपलनिपुण॥ अज्यावमकन्यापवस्कभावेकर्मधारये॥॥ अज्यकनिस्यादेशवतिअयँपापवाचिनिचोत्तरपदेभावसाविपूर्वपदं मक
॥सि०गु०॥ प्रकृत्या॥ गमनश्रेष्ठं॥ गमनज्यायः॥ गमनावमं॥ गमनकनिष्ठं॥ श्रेतिकिं॥ गमनशोभनं॥ भावेकिं॥ गम्यतेअनेनेतिगमनं ॥पं०स्व०समा॥
॥१५५॥ श्रेयोगमनश्रेयः॥ कर्मधारयेतिकिं॥ षष्ठीसमासेमाभूत॥ कुमारश्च॥ कर्मधारये॥ कुमारश्रमणा॥ कुमारशब्दोंतोदात्तः॥ आ
दिःप्रत्येनसि॥ कुमारस्यादिरुदात्तःप्रत्येनासिपरेकर्मधारये॥ प्रतिगतमेनोस्यसप्रत्येनाः॥ कुमारप्रत्येनाः॥ प्रगेष्वन्यतरस्या
प्रगागणास्तेषूक्तंवा॥ कुमारचातकाः॥ कुमारजीमूताः॥ आद्युदात्तत्वाभावेकुमारश्चेत्येवभवति॥ इगंतकालकपालभगाल
शरावेषुद्विगौ॥ एषुपरेषुपूर्वप्रकृत्या॥ पंचारत्नयःप्रमाणमस्यपंचारत्नि॥ निरेतुदशमास्यः॥ पंचमासान्भृतःपंचमास्यः॥ त
मधीष्टइत्यधिकारे द्विगोर्यप्॥ पंचकपालः॥ पंचभगालः॥ पंचशरावः॥ त्रेःसंख्याया इतिपंचशब्दआद्युदात्तः॥ इगंतादिषुकिं॥ पं
चाश्वः॥ द्विगौकिं॥ परमारत्निः॥ बह्वन्यतरस्यां॥ बहुशब्दस्तथावा॥ बह्वरत्निः२ बहुमास्यः२ बहुकपालः॥ बहुशब्दोंतोदा ॥१५५॥
त्तः॥ नस्यणिउदात्तस्वरितयोरितिभवति॥ दिष्टिवितस्त्योश्च॥ एतयोःपरतःपूर्वपदंप्रकृत्यावाद्विगौ॥ पंचदिष्टिः२ पं
चवितस्तिः२ सप्तमीसिद्धशुष्कपक्वबंधेष्वकालात्॥ अकालवाचिसप्तम्यंतंप्रकृत्यासिद्धादिषु॥ सांकाश्यसिद्धः॥ सांकाश्ये

तिण्यांतः॥ आतपशुष्कः॥ भ्राष्ट्रपक्वः॥ भ्राष्ट्रेतिष्ट्रन्नंतः॥ चक्रबंधः॥ चक्रशब्दोंतोदात्तः॥ अकालात्किं॥ पूर्वाह्णसिद्धः॥ कृत्स्वरेणबाधितःसप्त
मीस्वरःप्रतिप्रसूयते॥ परिप्रत्युपापावर्ज्यमानाहोरात्रावयवेषु॥ एतेप्रकृत्यावर्ज्यमानवाचिनिअहोरात्रावयववाचिनिचोत्तरपदे॥ परि
त्रिगर्त्तंवृष्टोदेवः॥ प्रतिपूर्वाह्णं॥ प्रत्यपरात्रं॥ उपपूर्वरात्रं॥ अपगर्त्तं॥ उपसर्गाआद्युदात्ताः॥ बहुव्रीहितत्पुरुषयोःसिद्धत्वादव्ययीभावा
अर्ज्यमाना र्थमिदं॥ अपपर्योरेववर्ज्यमानोत्तरपदं॥ तयोरेववर्जनोर्थत्वात॥ अहोरात्रावयवा अपिवर्ज्यमानाएवतयोर्भवंति॥ वर्ज्येतिकिं॥ अग्निं
प्रतीतिप्रत्यग्निं॥ राजन्यबहुवचनद्वंद्वेंधकवृष्णिषु॥ राजन्यवाचिनांबहुवचनानामंधकवृष्णिषुवर्त्तमानेद्वंद्वेपूर्वपदंप्रकृत्या॥ श्वाफ
ल्कचैत्रकाः॥ शिनिवासुदेवाः॥ शिनिशब्दआद्युदात्तोलक्षणयातदपत्येवर्त्तते॥ राजन्येतिकिं॥ द्वैप्यभैमायनाः॥ द्वीपेभवाद्वैप्याः॥ भैमेर
पत्यंयुवाभैमायनः॥ अंधकवृष्णयएतेनतुराजन्याः॥ केत्यणंतः॥ राजन्यग्रहणमिहाभिषिक्तवंश्यानांक्षत्रियाणांग्रहणार्थं॥ नैतत
था॥ बहुवचनंकिं॥ संकर्षणवासुदेवौ॥ द्वंद्वेकिं॥ वृष्णीनांकुमाराः॥ वृष्णिकुमाराः॥ अंधकवृष्णिषुकिं॥ कुरुपांचालाः॥ संख्या॥ संख्यावा
चिपूर्वपदंप्रकृत्याद्वंद्वे॥ द्वादश॥ त्रयोदश॥ त्रेस्त्रयादेशोंतोदात्तोनिपात्यते॥ आचार्योपसर्जनश्चांतेवासी॥ आचार्योपसर्जनांतेवासि
रौढी२ नांद्वंद्वेपूर्वपदंप्रकृत्या॥ पाणिनीयरौढीयाः॥ छस्वरेमध्योदात्तावेतौ॥ आचार्योपसर्जनग्रहणंद्वंद्वविशेषणं॥ सकलोद्वंद्वआचार्योपसर्जनो
यथाविज्ञायेत॥ तेनेहन॥ पाणिनीयदेवदत्तौ॥ आचार्येतिकिं॥ छांदसवैयाकरणाः॥ अंतेवासीकिं॥ आपिशलपाणिनीयेशास्त्रे॥
ण२

कृतस्यैदं कुऊ पस्ये दभित्लक्षणं तावेतौ

२९ कार्त्तकौजपादयश्च॥ एषां द्वंद्वे पूर्वपदं प्रकृत्या॥ कार्त्तकौजपौ सावर्णिमांडूकेयौ॥ महान्व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिल बै० स्व० समा०
॥सि०कौ०॥ रौररवप्रवृद्धेषु॥ महच्छब्दः प्रकृत्या व्रीह्यादिषु दशस्व॥ महाव्रीहिः॥ महापराह्णः॥ महागृष्टिः॥ महेष्वासः॥ महच्छब्दोंतोदात्तः॥ सन्महदिति
प्रतिपदोक्तसमास एवायं स्वरः॥ नेह॥ महतो व्रीहिर्महद्व्रीहिः॥ क्षुल्लकश्च वैश्वदेवे॥ चान्महान्॥ क्षुल्लकवैश्वदेवं॥ महावैश्वदेवं॥ क्षुधं
॥१९६॥ लातीति क्षुल्लं तस्मादज्ञातादिषु कोंतोदात्तः॥ उष्ट्रः सादिवाम्योः॥ उष्ट्रसादी॥ उष्ट्रवामी॥ उषेष्ट्रन् उष्ट्रः आद्युदात्तः॥ गोः सादसादिसा
गोसारः ५ रथिषु॥ गोसादिः॥ गोसारथिः॥ कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूः पण्यकंबलो दासीभाराणां
च॥ एषां समासानां दासीभारादेश्च पूर्वपदं प्रकृत्या॥ कुरूणां गार्हपतं कुरुगार्हपतं॥ उप्रत्ययांतः कुरुः॥ वृजेरिति वाच्यं॥ वृजिगा
र्हपतं॥ वृजिराद्युदात्तः॥ रिक्तो गुरुः रिक्तगुरुः॥ रिक्ते विभाषेति रिक्तशब्दः॥ आद्यंतोवोदात्तः॥ असूता जरती॥ असूतजरती॥
अश्लीला दृढरूपा॥ अश्लीलशब्दो नञ्समासत्वादाद्युदात्तः॥ श्रीर्यस्यास्ति तच्छ्लीलं॥ सिध्मादित्वाल्लच्॥ कपिलकादित्वा ॥१९६॥
ल्लत्वं॥ पारेवडवेव पारेवडवा॥ निपातनादिवार्थे समासो विभक्त्यलोपश्च॥ पारशब्दो घृतादित्वादंतोदात्तः॥ तैतिलानां क
द्रूः तैतिलकद्रूः॥ तैतिलिनोपत्यं छात्रो वा इत्यणंतः॥ पण्यशब्दो यदंतत्वादाद्युदात्तः॥ पण्यकंबलः संज्ञायामिति वक्तव्यं

अन्यत्र पणितव्ये कंबले समासांतोदात्तत्वमेव॥ प्रतिपदोक्ते समासे कृत्या इत्येष स्वरो विहितः॥ दास्या भारो दासीभारः॥ देवहूति
र्यस्य तत्पुरुषपूर्वपदप्रकृतिस्वरत्वमिष्यते॥ शिष्यवचन विहितं स सर्वो दासीभारादिषु द्रष्टव्य॥ सरायेसपुरंध्यां॥ पुरंशरीरंधी
यतेस्या मिति कर्मण्यधिकरणे चेति किप्रत्ययः॥ अलुक् छांदसः॥ न विषयस्येत्याद्युदात्तः पुरशब्दः॥ चतुर्थी तदर्थे॥ चतुर्थ्यं
तार्थाय यत्तद्वाचिन्युत्तरपदे चतुर्थ्यंतं प्रकृत्या॥ यूपाय दारु॥ अर्थे॥ अर्थशब्दे परे चतुर्थ्यंतं प्रकृत्या॥ देवार्थं॥ क्ते च॥ क्तांते परे
चतुर्थ्यंतं प्रकृत्या॥ गोहितं॥ कर्मधारयेनिष्ठा॥ क्तांते परे पूर्वमनिष्ठांतं प्रकृत्या॥ श्रेणिकृताः श्रेणिशब्द आद्युदात्तः॥ पूगकृ
ताः पूगशब्दोंतोदात्तः॥ कर्मधारये किं॥ श्रेण्या कृतं श्रेणिकृतं॥ अनिष्ठा किं॥ कृताकृतं॥ अहीने द्वितीया॥ अहीनवाचिनि स
नि मासे क्तांते परे द्वितीयांतं प्रकृत्या॥ कष्टश्रितः॥ ग्रामगतः॥ कष्टशब्दोंतोदात्तः॥ ग्रामशब्दो नित्स्वरेण॥ अहीने किं॥ कांतारात
तः॥ अनुपसर्ग इति वक्तव्यं॥ नेह सुखप्राप्तः॥ थाथेत्यस्यापवादोयं॥ तृतीया कर्मणि॥ कर्मवाचके क्तांते परे तृतीयांतं प्रकृत्या
खोतासः॥ रुद्रहतः॥ महाराजहतः॥ रुद्रोग्रगतः॥ कर्मणि किं॥ रथेन यातो रथयातः॥ गतिरनंतरः॥ कर्मार्थे क्तांते परे अव्यव
हितो गतिः प्रकृत्या॥ पुरोहितं॥ अनंतरः किं॥ अभ्युद्धृतः॥ कारकपूर्वपदस्य तु सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वक्तव्य॥ दूरादागतः॥ ता

थाथेत्यस्यापवादः
पवादः

२९
॥सि०कौ०॥ दैवनितिक्षत्यतौ॥ तकारादौनितितुशब्दवर्जितेक्तिपरेनंतरोगतिः प्रकृत्या॥ अग्नेरापोन्नतमस्यप्रभृतौ॥ संगतिंगोः॥ कृत्स्व ॥वै० स्व० समा०
रापवादः॥ तादौकिं॥ प्रजल्पाकः॥ नितिकिं॥ प्रकर्त्ता॥ तृजंतः॥ अतौकिं॥ आगंतुः॥ तवैचांतश्चयुगपत्॥ तवैप्रत्ययांतस्यांतउदा
॥१५८॥ त्तोगतिश्चानंतरः प्रकृत्यायुगपच्चैतदुभयंस्यात्॥ अन्वेतवाउ॥ कृत्स्वरापवादः॥ अनिगंतोंचतौवप्रत्यये॥ अनिगंतोगतिर्वप्रत्य श्चानंतरः
यांतेंचतौपरेप्रकृत्या॥ येपरांचस्तान्॥ अनिगंतइतिकिं॥ प्रत्यंचोयंतु॥ कुत्स्वरात्परत्वादयमेव॥ जाहिस्त्यानिलुण्ड्रापराचः॥ व
प्रत्ययेकिं॥ उदंचनं॥ न्यधीच॥ वप्रत्ययांतेचतौविगतावपिन्यधीप्रकृत्या॥ न्यङ्ङुत्तानः॥ उदात्तस्वरितयोर्यणः स्वरितोनंतरकारः स्व
रितः॥ अध्यङ्॥ ईषदन्यतरस्यां॥ ईषत्कडारः॥ ईषदित्ययमंतोदात्तः॥ ईष उं द्भेदस्तादौकृत्स्वरएव॥ हिरण्यपरिमाणंधने॥ सु
वर्णपरिमाणंवाचिपूर्वपदंप्रकृत्यावाधने॥ द्विसुवर्णपरिमाणमस्यतिद्विसुवर्णं॥ तदेवधनंद्विसुवर्णधनं॥ बहुव्रीहावपि
परत्वाद्विकस्वरएव॥ हिरण्यंकिं॥ प्रस्थधनं॥ परिमाणंकिं॥ कांचनधनं॥ धनेकिं॥ निष्कमाला॥ प्रथमोचिरोपसंपत्तौ॥ प्रथम ॥१५८॥
शब्दोवाप्रकृत्याभिन्नवत्वे॥ प्रथमवैयाकरणः॥ संप्रतिव्याकरणमध्येतुंप्रवृत्तः इत्यर्थः॥ प्रथमशब्दः प्रथेरमजंतः॥ अचिरे
तिकिं॥ प्रथमोवैयाकरणः॥ कतरकतमौकर्मधारये॥ वाप्रकृत्या॥ कतरकठः॥ कर्मधारयग्रहणमुत्तरार्थं॥ इहतुप्रतिपदोक्तो
सः

देवस्तिद्धं॥ आर्योब्राह्मणकुमारयोः॥ आर्यकुमारः॥ आर्यब्राह्मणः॥ आर्योण्यदंतत्वादंतस्वरितः॥ आर्यःकिं॥ परमब्राह्मणः॥ ब्रा
ह्मणेतिकिं॥ आर्यक्षत्रियः॥ कर्मधारयइत्येव॥ [illegible]॥ ब्राह्मणकुमारयोः परतोवाप्रकृत्याकर्मधारये॥ राजब्राह्मणः॥ राजकुमारः॥
योगविभागउत्तरार्थः॥ षष्ठीप्रत्येनसि॥ षष्ठ्यंतोराजाप्रत्येनसिपरेवाप्रकृत्या॥ राजप्रत्येनाः॥ षष्ठीकिं॥ अन्यत्रन॥ क्तेनित्यार्थे
क्तांतेपरेनित्यार्थेसमासेपूर्वप्रकृत्या॥ नित्यप्रहसितः॥ कालाइतिनित्यसमासोयं॥ नित्यशब्दस्त्वंतः आद्युदात्तः॥ प्रहसितः
तिथाथादिस्वरेणांतोदात्तोयं॥ नित्यार्थेन॥ मुहूर्त्तप्रहसितः॥ ग्रामःशिल्पिनि॥ वाप्रकृत्या॥ ग्रामनापितः॥ ग्रामआद्युदात्तः॥ ग्रा त्यवं ४
ग्राम मःकिं॥ परमनापितः॥ शिल्पिनिकिं॥ परमरथ्या॥ राजाचप्रशंसायां॥ शिल्पिवाचिनिपरेप्रशंसार्थंराजपदंवाप्रकृत्या॥ राजनापितः
राजकुलालः॥ प्रशंसायांकिं॥ राज्ञनापितः॥ शिल्पिनिकिं॥ राजहस्ती॥ आदिरुदात्तः॥ अधिकारोयं॥ सप्तमीहारिणौधर्म्येहरणे
सप्तम्यंतंहारिवाचिचआद्युदात्तंधर्म्येपरे॥ देयंयःस्वीकरोतिसहारीत्युच्यते॥ धर्म्यमित्याचारनियतंदेयं॥ मुकुटेकार्षापणं॥ हलेद्वि
पदिका॥ संज्ञायामितिसप्तमीसमासः॥ कारनाम्निचेत्यलुक्॥ याज्ञिकाश्वः॥ वैयाकरणहस्ती॥ कश्चिदयमाचारः॥ मुकुटादिषु
कार्षापणादिदातव्यं॥ याज्ञिकादीनांत्वश्चादिरिति॥ धर्म्येकिं॥ स्तंबेरमः॥ अहरणेकिं॥ वाडवहरणं॥ वडवायाअयंवाडवः॥

३०
॥सि०कौ०॥ तस्य बीजनिषेकादुत्तरकाले शरीरपुष्ट्यर्थं यद्दीयते तदुद्धरणमित्युच्यते ॥ परोऽपि कृत्स्वरो हारिस्वरेण बाध्यते ऽस्य हरणनिषेधे वै०स०समा०
न तात्पर्यं ते ॥ तेन वाडवहार्यमित्यत्र हारिः स्वरः सिध्यति ॥ युक्ते च ॥ युक्तवाचिनि समासे पूर्वमाद्युदात्तं ॥ गोवल्लवः ॥ कर्तव्ये तत्प
॥१५९॥ रो युक्तः ॥ विभाषाध्यक्षे ॥ गवाध्यक्षः ॥ पापं च शिल्पिनि ॥ वा ॥ पापनापितः २ ॥ पापाणके इति प्रतिपदोक्तग्रहणात्षष्ठीस
मासे न ॥ गोत्रांतेवासिमाणवब्राह्मणेषु क्षेपे ॥ भार्यासौश्रुतः ॥ सुश्रुतापत्यस्य भार्याप्रधानतया क्षेपः ॥ अंतेवासी
कुमारीदाक्षाः ॥ ओदनपाणिनीयाः ॥ कुमार्यादिलाभकामा ये दाक्ष्यादिभिः प्रोक्तानि शास्त्राण्यधीयते ते एवं क्षिप्यं
ते ॥ भिक्षामाणवः ॥ भिक्षां लप्स्येऽहमिति माणवः ॥ भयब्राह्मणः ॥ भयेन ब्राह्मणः संपद्यते ॥ गोत्रादिषु किं ॥ दासीश्रोत्रि
यः ॥ क्षेपे किं ॥ परमब्राह्मणः ॥ अंगानि मैरेये ॥ मद्यविशेषो मैरेयः ॥ मधुमैरेयः ॥ मधुविकारस्य तस्य मधु अंगं ॥ अंगा अंगं मधं गं·
नि किं ॥ परममैरेयः ॥ मैरेये किं ॥ पुष्पासवः ॥ भक्ताख्यास्तदर्थेषु ॥ भक्तमन्नं ॥ भिक्षाकंसः ॥ भाजाकंसः ॥ भिक्षादयोऽन्न ॥१५९॥
विशेषाः ॥ भक्ताख्याः किं ॥ समाशालयः ॥ समशनं समाः इति क्रियामात्रमुच्यते ॥ तदर्थेषु किं ॥ भिक्षाप्रियः ॥ बहु
ब्रीहिरयमतः पूर्वपदमंतोदात्तं ॥ गोबिडालसिंहसैंधवेषूपमाने ॥ धान्यगवः ॥ गोबिडालः ॥ तृणसिंहः ॥ सक्तुसैंधवः ॥

धान्यं गौरिवेति विग्रहः ॥ व्याघ्रादिः ॥ गवाकृत्या सन्निवेशितं धान्यं धान्यगवशब्देनोच्यते ॥ उपमाने किं ॥ परमसिंहः ॥ अके
जीविकार्थे ॥ दंतलेखकः ॥ यस्य दंतलेखनेन जीविका ॥ नित्यं क्रीडेति समासः ॥ अके किं ॥ रमणीयकर्ता ॥ जीविकार्थे किं ॥ इक्षुभक्षिकां
मे धारयसि ॥ प्राचां क्रीडायां ॥ प्राग्देशवासिनां या क्रीडा तद्वाचिनि समासे अकप्रत्ययांते परे पूर्वमाद्युदात्तं स्यात् ॥ उद्दालकपुष्पभं
जिका संज्ञायामिति ण्वुल् ॥ प्राचां किं ॥ जीवपुत्रप्रचायिका ॥ इयमुदीचां क्रीडा ॥ क्रीडायां किं ॥ तव पुष्पप्रचायिका ॥ पर्याये ति ण्वु
ल् ॥ अणि नियुक्ते ॥ अणंते परे युक्तवाचिनि समासे पूर्वमाद्युदात्तं ॥ छत्रधारः ॥ नियुक्ते किं ॥ कांडलावः ॥ शिल्पिनि चाकृञः ॥ शि
त ल्पिवाचिनि समासे अणंते परे पूर्वमाद्युदात्तं स चेदण् कृञो न भवति ॥ तंतुवायः ॥ तुन्नवायः ॥ शिल्पिनि किं ॥ कांडलावः ॥ अकृञः
किं ॥ कुंभकारः ॥ संज्ञायां ॥ अणंते परे ॥ तंतुवायो नाम कृमिः ॥ अकृञ इत्येव ॥ रथकारो नाम ब्राह्मणः ॥ गोतंतियवं पाले ॥ गोपा
लः ॥ तंतिपालः ॥ यवपालः ॥ अनियुक्तार्थो योगः ॥ गो इति किं ॥ वत्सपालः ॥ पाले किं ॥ गोरक्षः ॥ णिनि ॥ पुष्पहारी ॥ उपमानं श
ब्दार्थप्रकृतावेव ॥ उपमानवाचि पूर्वं णिन्यंते परे आद्युदात्तं ॥ उष्ट्रक्रोशी ॥ ध्वांक्षविरावी ॥ उपमानग्रहणमस्य पूर्वस्य च वि
षयविभागार्थं ॥ शब्दार्थप्रकृतौ किं ॥ वृकवंची ॥ प्रकृतिग्रहणं किं ॥ प्रकृतिरेव यत्रोपसर्गनिरपेक्षा शब्दार्था तत्रैव यथा स्यात्
मा गतिवानपेक्ष यत्र

वज्रः

मी॰ हावी

इन्द्रमाभृत॥ गर्दभोच्चारी॥ युक्तारोह्यादयश्च॥ आद्युदात्ताः॥ युक्तारोही॥ आगतयोधी॥ क्षीरहोता॥ दीर्घकाशतुषभ्राष्ट्रवटं जे॥ कुटीजः
 काशजः॥ तुषजः॥ भ्राष्ट्रजः॥ अंत्यात्पूर्वं बह्वचः॥ बह्वचः पूर्वपदस्यांत्यात्पूर्वमुदात्तं जेउत्तरपदे॥ उपसरजः॥ आमलकीजः॥ बह्वचः किं॥ दग्धजा
 नि तृणानि॥ ग्रामेऽनिवसंतः॥ ग्रामे परे पूर्वमुदात्तं तच्चेन्निवसद्वाचि न॥ मल्लग्रामः॥ ग्रामशब्दोत्र समूहवाची॥ देवग्रामः॥ देवस्वामि
कः॥ अनिवसंतः किं॥ दाक्षिग्रामः॥ दाक्षिनिवासः॥ घोषादिषु च॥ दाक्षिघोषः॥ दाक्षिकटः॥ दाक्षिह्रदः॥ छात्र्यादयः शालायां॥ छात्रि
शाला॥ व्याडिशाला॥ यदापि शालांतः समासो नपुंसकलिंगो भवति तदापि तत्पुरुषे शालायां नपुंसके इत्येतस्मात्पूर्वं प्रतिषेधेना
यमेव स्वरः॥ छात्रिशालं॥ प्रस्थेऽवृद्धमकर्क्यादीनां॥ प्रस्थशब्दे उत्तरपदे कर्क्यादिवर्जितमवृद्धं पूर्वपदमाद्युदात्तं स्यात्॥ इंद्रप्रस्थः॥ अ
वृद्धं किं॥ दाक्षिप्रस्थः॥ अकर्क्यादीनां किं॥ कर्कीप्रस्थः॥ मकरीप्रस्थः॥ मालादीनां च॥ वृद्धार्थमिदं॥ मालाप्रस्थः॥ शोणाप्रस्थः॥ अमहन्न
वं नगरेऽनुदीचां॥ नगरे परे महन्नववर्जितं पूर्वमाद्युदात्तं स्यात्तच्चेदुदीचां न॥ ब्रह्मनगरं॥ अमेति किं॥ महानगरं॥ नवनगरं॥ अनु
दीचां किं॥ कार्तिनगरं॥ अर्मे चावर्णं द्व्यच् त्र्यच्॥ अर्मे परे द्व्यच् त्र्यच् [illegible] पूर्वमवर्णांतमाद्युदात्तं॥ गुप्तार्मं॥ कुक्कुटार्मं॥ अवर्णं किं॥ बृ गतोर्मं
हदर्मं॥ द्व्यच् त्र्यच् किं॥ कपिंजलार्मं॥ अमहन्नवमित्येव॥ महार्मं॥ नवार्मं॥ नभूताधिकसंजीवमद्राश्मकज्जलं॥ अर्मे परे नैतान्या

मद्रेपरे भूताद्याद्युदात्तानि

द्युदात्तानि॥ भूतार्मं॥ अधिकार्मं॥ संजीवार्मं॥ मद्राश्मकग्रहणं संघातविगृहीतार्थं॥ मद्रार्मं॥ मद्राश्मार्मं॥ कज्जलार्मं॥ आद्युदात्तप्र
करणे दिवोदासादीनां छंदस्युपसंख्यानं॥ दिवोदासाय दाशुषे॥ अंतः॥ अधिकारोयं॥ प्रागुत्तरपदादिग्रहणात्॥ सर्वं गुणकार्त्स्न्ये॥
सर्वशब्दः पूर्वपदमंतोदात्तं॥ सर्वश्वेतः॥ सर्वमहान्॥ सर्वं किं॥ परमश्वेतः॥ आश्रयव्याप्त्या परमत्वं श्वेतस्येति गुणकार्त्स्न्यं वर्त
ते॥ गुणः किं॥ सर्वसौवर्णः॥ कार्त्स्न्ये किं॥ सर्वेषां श्वेततरः सर्वश्वेतः॥ संज्ञायां गिरिनिकाययोः॥ एतयोः परतः पूर्वपदमंतोदात्तं॥
अंजनागिरिः॥ मौंडिनिकायः॥ संज्ञायां किं॥ परमगिरिः॥ ब्राह्मणनिकायः॥ कुमार्यां वयसि॥ पूर्वपदमंतोदात्तं॥ वृद्धकुमारी॥
कुमारीशब्दः पुंसा सह संप्रयोगाभावप्रवृत्तिनिमित्तमुपादाय प्रयुक्तो वृद्धादिभिः समानाधिकरणः॥ तत्र च यद्यपि वृद्धत्वेन
कुमारत्वमेव॥ वयसि किं॥ परमकुमारी॥ उदकेऽकेवले॥ अकेवलं मिश्रं तद्वाचिनि समासे उदके परे पूर्वमंतोदात्तं॥ गुडोदकं॥ स्व
रे कृते एकादेशः स्वरितो वानुदात्ते पदादाविति पक्षे स्वरितः॥ अकेवले किं॥ शीतोदकं॥ द्विगौ क्रतौ॥ द्विगावुत्तरपदे क्रतुवाचिनि
समासे पूर्वपदमंतोदात्तं॥ गर्गत्रिरात्रः॥ द्विगौ किं॥ अतिरात्रः॥ क्रतौ किं॥ बिल्वहोमस्य सप्तरात्रः बिल्वसप्तरात्रः॥ सभायां नपुं
सके॥ सभायां परतो नपुंसकलिंगे समासे पूर्वमंतोदात्तं॥ गोपालसभं॥ स्त्रीसभं॥ सभायां किं॥ ब्राह्मणसेनं॥ नपुंसके किं॥ रा

३२

जसभा।। प्रतिपदोक्तनपुंसकग्रहणान्नेह।। रमणीयसभं।। ब्राह्मणकुलं।। परेप्राचां।। शिवदत्तपुरं।। प्राचांकिं शिवपुरं।। अरिष्ट गौरीपुरं
।।सि०उ०।। गौडपूर्वेच।। पुरेपरेअरिष्टगौडपूर्वेसमासेपूर्वपदमंतोदात्तं।। अरिष्टपुरं।। गौडपुरं।। पूर्वग्रहणंकिं।। इहापियथास्यात्।। अरि दे० स्व० समा०
ष्टश्रितपुरं।। गौडभृत्यपुरं।। नहास्तिनफलकमार्देयाः।। पुरेपरेनैतान्यंतोदात्तानि।। हास्तिनपुरं।। फलकपुरं।। मार्देयपुरं।। अ
।।१६०।। तेरपत्यमितिशुद्धित्वा ढक्।। कुसूलकूपकुंभशालंबिले।। एतान्यंतोदात्तानि बिलेपरे।। कुसूलबिलं।। कूपबिलं।। कुंभबि
लं।। शालाबिलं।। कुसूलादीनिकिं।। सर्पबिलं।। बिलेकिं।। कुसूलस्वामी।। दिक्शब्दाजानपदाख्यानचानराटेषु।। दिक्श
ब्दाअंतोदात्ताभवंत्येषु।। पूर्वेषुकामशमी।। अपरकृष्णमृत्तिका।। जनपदा।। पूर्वपांचालाः।। आख्याने पूर्वयायातं।। पूर्वचान मारवानं
राटे।। शब्दग्रहणंकालवाचिनोपिदिक्शब्दस्यपरिग्रहार्थं।। आचार्योपसर्जनश्चांतेवासिनि।। आचार्योपसर्जनांतेवासि
निपरेदिक्शब्दा अंतोदात्ताभवंति।। पूर्वपाणिनीयाः।। आचार्येचातिकं।। पूर्वांतेवासी।। अंतेवासिनिकिं।। पाणिनीये।।
शास्त्रे उत्तरपदवृद्धौसर्वंच।। उत्तरपदस्येत्यधिकृत्य याच्वृद्धिर्विहिता तद्वत्युत्तरपदेपरे सर्वशब्दोदिक्शब्दाश्चांतोदात्ता ।।१६०।।
भवंति।। सर्वपांचालकः।। अपरपांचालकः।। अधिग्रहणंकिं।। सर्वभासः।। सर्वकारकः।। बहुव्रीहौविश्वंसंज्ञायां।। बहुव्रीहौ
का

विश्वशब्दःपूर्वपदभूतःसंज्ञायामंतोदात्तःस्यात्।। पूर्वपदप्रकृतिस्वरेणप्राप्तस्याद्युदात्तस्यापवादः।। विश्वकर्मा विश्वदेवः।। विश्व
देवंसत्वातिं।। बहुव्रीहौकिं।। विश्वेचतेदेवाश्च।। विश्वेदेवाः।। संज्ञायांकिं।। विश्वदेवः।। प्रागव्ययीभावाद्बहुव्रीह्यधिकारः।। उदराश्वेषुषु
दरोदरः।। ऋर्यश्वः।। महेषुः।। क्षेपे।। उदराश्वेषुषुपूर्वपदमंतोदात्तं बहुव्रीहौनिंदायां।। घटोदरः।। कटुकाश्वः।। चलाचलेषुः।। अनु
दरस्त्यत्रनञ्सुभ्यामितिभवतिविप्रतिषेधेन।। नदीबंधुनि।। बंधुशब्देपरेनद्यंतपूर्वमंतोदात्तं बहुव्रीहौ।। गार्गीबंधुः।। नदी
गौरीपुत्रः किं।। ब्रह्मबंधुः।। ब्रह्मशब्दआद्युदात्तः।। बंधुनिकिं।। गार्गीप्रियः।। निष्ठोपसर्गपूर्वमन्यतरस्यां।। निष्ठांतंपूर्वपदमंतोदात्तंवा
प्रधौतपदः।। निष्ठाकिं।। प्रसेवकमुखः।। उपसर्गपूर्वाकिं।। शुष्कमुखः।। उत्तरपदादिः।। उत्तरपदाधिकारआपादांतः।। आद्यधिकारस्तुप्र
कृत्यांभगालमित्यवधिकः।। कर्णोवर्णलक्षणात्।। वर्णवाचिनोलक्षणवाचिनश्चपरःकर्णशब्दः आद्युदात्तोबहुव्रीहौ
शुक्लकर्णः।। शंकुकर्णः।। कर्णःकिं।। श्वेतपादः।। वर्णलक्षणात्किं।। शोभनकर्णः।। संज्ञौपम्ययोश्च।। कर्णआद्युदात्तः।। मणिकर्णः
औपम्ये।। गोकर्णः।। कंठपृष्ठग्रीवाजंघंच।। संज्ञौपम्ययोर्बहुव्रीहौ।। शितिकंठः।। कांडपृष्ठः।। सुग्रीवः।। नाडीजंघः।। खरकं
ठः।। गोपृष्ठः।। अश्वग्रीवः।। गोजंघः।। शृंगमवस्थायांच।। शृंगशब्दोवस्थायां संज्ञौपम्ययोश्चाद्युदात्तोबहुव्रीहौ।। उद्गत

कृतोवत्सादेर्विपो-

॥सि०कौ०॥ शृंगः॥ द्वयंगुलशृंगः॥ अत्रशृंगोद्गमनादिततोगवादेर्वयोविशेषो वस्त्रसंज्ञायां॥ ऋष्यशृंगः॥ उपमायां॥ मेषशृंगः॥ अ दे॰स्व॰समा॰
वस्थेतिकिं॥ स्थूलशृंगः॥ नञोजरमरमित्रमृताः॥ नञः पर एते आद्युदात्ताः बहुव्रीहौ॥ तामेजरा अजरं॥ अमित्रमर्दय
॥१६२॥ अवोदेवेषमृतो॥ नञः किं॥ ब्राह्मणमित्रः॥ जेतिकिं॥ अशत्रुः॥ सोर्मनसी अलोमोषसी॥ सोः परे लोमोषसी वर्जयि
त्वा मन्नंतमसंतं वाद्युदात्तं स्यात्॥ नञः सुभ्यामित्येतस्यापवादः॥ सुकर्माणः सुरुच॥ सनो वृक्षद्रुनिमानः सुब्रह्म॥
णि वाप शुत्यः सुमनाः सुवर्चाः॥ सुपेशसस्करति॥ सोः किं॥ कलकर्मा॥ मनसी किं॥ सुराजा॥ अलोमोषसी किं॥ सुलोमा
सुखा॥ क्रत्वादीन्पूर्वमितिभवति स्फकर्मकः॥ स्फ स्थो तस्कः॥ [illegible] सोः परे आद्युदात्ताः॥ सुक्रतुः॥ सुप्रतीकः क्रत्वादयश्च ४
सुहव्यः॥ सुप्रतूर्तिमनेहसं॥ आद्युदात्तं द्व्यच्छंदसि॥ पदाद्युदात्तं द्व्यच्कं सोः उत्तरपदं बहुव्रीहावाद्युदात्तं॥ अधास्व ॥१६२॥
श्वाः॥ सुरथा आतिथिग्वे॥ नित्स्वरेणाश्वरथावाद्युदात्तौ॥ आद्युदात्तं किं॥ यास्कवाकुः॥ द्व्यच्कं किं॥ सुगुरसत्सुहि
रण्यः॥ हिरण्यपादश्रू॥ वीरवीयौ च॥ सोः परो बहुव्रीहौ छंदस्याद्युदात्तौ॥ सुवीरेण रयिणा॥ सुवीर्यस्य गोमतः॥

वीर्यशब्दो यत्प्रत्ययांतः॥ तत्र यतो नावइत्याद्युदात्तत्वं नेतिवीर्यग्रहणं ज्ञापकं॥ तत्र हि सति पूर्वेणैव सिद्धं स्यात्॥ कूल
तीरतूलमूलशालाक्षसममव्ययीभावे॥ उपकूलं॥ परितीरं॥ उपतूलं॥ उपशालं॥ उपाक्षं॥ सुषुमं॥ विषमं॥ तिष्ठद्गुप्रभृति
षिते॥ कूलादिग्रहणं किं॥ उपकुंभं॥ अव्ययीभावे किं॥ परमकूलं॥ कंसमंथशूर्पपाय्यकांडं द्विगौ॥ द्विकंसः॥ द्विमंथः॥
द्विशूर्पः॥ द्विपाय्यं॥ द्विकांडं॥ द्विगौ किं॥ परमकंसः॥ तत्पुरुषे शालायां नपुंसके॥ शालाशब्दांते तत्पुरुषे नपुंस
कलिंगे उत्तरपदमाद्युदात्तं॥ ब्राह्मणशालं॥ तत्पुरुषे किं॥ दृढशालं॥ शालायां किं॥ ब्राह्मणसेनं॥ नपुंसके किं॥ ब्रा
ह्मणशाला॥ कंथा च॥ तत्पुरुषे नपुंसकलिंगे कंथाशब्द उत्तरपदमाद्युदात्तं॥ सौशमिकंथं॥ आह्वरकंथं॥ नपुं ६४
सके किं॥ दाक्षिकंथा॥ आदिश्चिहणादीनां॥ कंथांते तत्पुरुषे नपुंसकलिंगे चिहणादीनामादिरुदात्तः॥ चिहणकंथं॥ मदरकंथं॥ सु
आदिरिति वर्तमाने पुनर्ग्रहणं पूर्वपदान्तस्याद्युदात्तार्थं॥ चेलखेटकटुककांडं गर्हायां॥ चेलादीनामुत्तरपदान्याद्युदात्ता
नि॥ पुत्रचेलं॥ नगरखेटं॥ दधिकटुकं॥ प्रजाकांडं॥ चेलादिसादृश्येन पुत्रादीनां गर्हा॥ व्याघ्रादित्वात्समासः॥ गर्हायां किं॥ पर
मचेलं॥ चीरमुपमानं॥ वस्त्रचीरं॥ कंबलचीरं॥ उपमानं किं॥ परमचीरं॥ पललसूपशाकं मिश्रे॥ घृतपललं॥ घृतसूपः॥ घृतशा

॥सि॰कौ॰॥ कं॥ पत्नस्स्रुपः॥ भक्ष्येण मिश्रीकरणमिति समासः॥ मिश्रे किं॥ परमपललं॥ कूलसूदस्थलकर्षाः संज्ञायां॥ आद्युदात्तास्तत्पुरुषे पू॰ म॰ समा॰
दाक्षिकूलं॥ शांडिसूदं॥ दांडायनस्थली॥ दाक्षिकर्षः॥ ग्रामसंज्ञा एताः॥ संज्ञायां किं॥ परमकूलं॥ अकर्मधारये राज्यं॥ कर्म
॥१६८॥ धारयवर्जिते तत्पुरुषे राज्यमुत्तरपदमाद्युदात्तं॥ ब्राह्मणराज्यं॥ अकर्मे किं॥ परमराज्यं॥ चेलराज्यादिस्वरादव्ययस्वरः पूर्व
विप्रतिषेधेन॥ कुचेलं॥ कुराज्यं॥ गर्ग्यादयश्च॥ अर्जुनवर्ग्यः॥ वासुदेवपक्षाः॥ अकर्मधारय इत्येव॥ गर्ग्यो दिदिगादीतग परमवर्ग्यः॥
पः॥ पुत्रः पुंभ्यः॥ पुंशब्देभ्यः परः पुत्र आद्युदात्तस्तत्पुरुषे॥ दाशकिपुत्रः॥ माहिषपुत्रः॥ पुत्रः किं॥ कौ[illegible]टिमातुलः॥ ल
पुंभ्यः किं॥ दासीपुत्रः॥ नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः॥ एभ्यः पुत्रो नाद्युदात्तः॥ आख्याग्रहणात्पर्यायाणां तद्वि
शेषाणां च ग्रहणं॥ आचार्यपुत्रः॥ उपाध्यायपुत्रः॥ शाकटायनपुत्रः॥ राजपुत्रः॥ ईश्वरपुत्रः॥ नंदनपुत्रः॥ ऋत्विक्पुत्रः॥ याजकपुत्रः॥
होतृपुत्रः॥ संयुक्ताः संबंधिनः॥ श्यालपुत्रः॥ ज्ञातयो मातृपितृसंबंधेन बांधवाः॥ ज्ञातिपुत्रः॥ भ्रातृपुत्रः॥ चूर्णादीन्यप्राणिषष्ठ्याः॥ ॥१६८॥
एतानि प्राणिभिन्नषष्ठ्यंतात्पराण्याद्युदात्तानि तत्पुरुषे॥ मुद्गचूर्णं॥ अप्राणीति किं॥ मत्स्यचूर्णं॥ षट्चकांडादीनि॥ अप्राणिष
ष्ठ्या आद्युदात्तानि॥ दर्भकांडं॥ दर्भचीरं॥ तिलपललं॥ मुद्गसूपः॥ मूलकशाकं॥ नदीकूलं॥ षट्किं॥ राजसूदः॥ अप्राणिति किं॥

दत्तकांडं॥ कुंडं वनं॥ कुंडमाद्युदात्तं वनवाचिनि तत्पुरुषे॥ दर्भकुंडं दर्भशब्दोऽत्र सादृश्ये॥ वनं किं॥ मृत्कुंडं॥ प्रकृत्या भगालं॥ भगालवाच्युत्त
रपदं तत्पुरुषे प्रकृत्या॥ कुंभीभगालं॥ कुंभीनदालं॥ कुंभीकपालं॥ मध्योदात्ता एते॥ प्रकृत्येत्यधिकृतमंत इति यावत्॥ शितेर्नित्याबह्व
ज्बहुव्रीहावभसत्॥ शितेःपरं नित्याबह्वच्कं प्रकृत्या॥ शितिपादः॥ शित्यंसः॥ पादशब्दो वृषादित्वादाद्युदात्तः॥ अंसशब्दः प्रत्ययस्य
नित्वात्॥ शितेः किं॥ दर्शनीयपादः॥ अभसत् किं॥ शितिभसत्॥ शितिराद्युदात्तः॥ पूर्वपदप्रकृतिस्वरापवादयोग॥ गतिकारकोपप
दात्कृत्॥ एभ्यः कृदंतं प्रकृतिस्वरं तत्पुरुषे॥ प्रकारकः॥ प्रहरणं॥ शोणा धृष्णू न्वाहसा॥ नाहि धाइत्यादिनाग्र क्तन्॥ इधमप्रश्चनः॥
उपपदात्॥ उच्चैःकारं॥ ईषत्करः॥ गतीति किं॥ देवस्य कारकः॥ शेषषष्ठी॥ कृद्ग्रहणं स्पष्टार्थं॥ प्रपचतितरामित्यत्र तरवाच्य प्रत्यये
न समासे कृते आम्॥ तत्र सतिशिष्टत्वादाम्स्वरो भवतीत्येके॥ प्रपचतिदेश्यार्थं कृद्ग्रहणमित्यन्ये॥ उभे वनस्पत्यादिषु युगपत्॥
एषु पूर्वोत्तरपदे युगपत्प्रकृत्या॥ वनस्पतिं वन आ॥ बृहस्पतिं यः॥ बृहच्छब्दो वाद्युदात्तो निपात्यते॥ तर्षयाशचीपतिं॥ शांडिरवां
दित्वादाद्युदात्तः॥ शचीशब्दः॥ शाची भिर्न इति दर्शनात्॥ तनूनपात्॥ नराशंसं वाजिनं॥ निपातनाद्दीर्घः॥ शुनःशेपं॥ देवना ह
व॥ उभे युगपत्प्रकृत्या स्तः॥ आयदं द्रावरुणा॥ इंद्राबृहस्पती वयं॥ देवता किं॥ प्लक्षन्यग्रोधौ॥ द्वंद्वे किं॥ अग्निष्टोमः॥ नोत्तरप

दे नुदात्तादावपृथिवीरुद्रपूषमंथिषु॥ पृथिव्यादिवर्जिते नुदात्तादावुत्तरपदे प्लुतं तेन॥ इंद्राग्निभ्यां कं वृषणः॥ अपृथिव्यादौ किं॥ द्यावा वे० स्व० समा०
॥सि०कु०॥ पृथिवी जनयन्॥ आद्युदात्तो द्यावाशब्दो निपात्यते॥ पृथिवी त्यंतोदात्तः॥ सोमारुद्रौ॥ रोदेर्णिलुक् चेति रगंतो रुद्रशब्दः॥ इंद्रापूषणो
श्वन्नुक्षन्पूषन्निति पूषा अंतोदात्तो निपात्यते॥ शुक्रामंथिनौ॥ मंथीइन्नंडीषधातः दंतोदात्तः॥ उत्तरपदग्रहणमनुदात्तादावि
॥१६६॥ त्युत्तरपदविशेषणं यथा स्यात्॥ द्वंद्वविशेषणं माभूत्॥ अनुदात्तादावितिविधिप्रतिषेधयोर्विषयविभागार्थं॥ अंतः॥ अ
धिकारोयं॥ थाथघञ्क्ताजबित्रकाणां॥ थ अथ घञ् क्त अच् अप् इत्र क एतदंतानां गतिकारकोपपदात्परेषामंतउदात्तः॥ प्र
भृथस्यायोः॥ आवसथः॥ घञ्प्रभेदः॥ क्त धर्त्तोवज्री पुरुष्टुतः॥ पुरुषु बहु प्रदेशेषु स्तुत इति विग्रहः॥ अच् प्रक्षयः॥ अप् प्रल
वः॥ इत्र प्रलवित्रं॥ क गोवृषः॥ मूलविभुजादित्वात्कः॥ गति कारकोपपदादित्येव॥ सुस्तुतं भवता॥ सुपमानात्क्तः॥ सोरुप
मानाच्च परं क्तांतमंतोदात्तं॥ सतस्ययोनौ सुहुतस्य॥ शशप्लुतः॥ संज्ञायामनाचितादीनां॥ गतिकारकोपपदात् क्तांतमंतोदात्तं चित। ॥१६६॥
नाचितादीन्वर्जयित्वा॥ उपहूतः शाकल्यः॥ परिजग्धः॥ अ नेति किं॥ आचितः॥ आस्थापितं॥ प्रवृद्धादीनां च॥ एषां क्तां
तमुत्तरपदमंतोदात्तं प्रवृद्धः प्रयुक्तः॥ असंज्ञार्थोयमारंभः॥ आकृतिगणोयं॥ कारकाद्दत्तश्रुतयोरेवाशिषि॥ संज्ञा
यामंतउदात्तः॥ देवदत्तः॥ विष्णुश्रुतः॥ कारकात्किं॥ संश्रुतो रामायणः॥ दत्तश्रुतयोः किं॥ देवपालितः॥ आस्मान्नियमादत्र
भ

संज्ञायामितिमनेन॥ तृतीया कर्मणीति तु भवति॥ एवकारः किं॥ कारकावधारणं यथा स्यात्॥ दत्तश्रुतावधारणं माभूत्॥ अकारकादपि द
त्तश्रुतयोरंत उदात्तो भवति॥ संश्रुतः॥ आशिषि किं॥ देवैः खाता देवखाता॥ आशिष्येवेत्येवमत्रैवेति नियमः॥ तेनानाहतो नदति
पद देवदत्तस्त्यत्र न॥ गारवविशेषस्य संज्ञेयं॥ तृतीया कर्मणीति पूर्वप्रकृतिस्वरत्वमेव भवति॥ इत्थंभूतेन कृतमिति च॥ इत्थंभूतेन कृ
तमित्येतस्मिन्नर्थे यः समासस्तत्र क्तांतमुत्तरपदमंतोदात्तं स्यात्॥ सुप्तप्रलपितं॥ प्रमत्तगीतं॥ कृतमिति क्रियासामान्ये करो
किंतु तिर्न्नाभूतप्रादुर्भाव एव॥ तेन प्रलपितादावपि कृतं भवति॥ तृतीया कर्मणीत्यस्यापवादः॥ अनो भावकर्मवचनः॥ कारकात्परमन
प्रत्ययांतं भाववचनं कर्मवचनं चांतोदात्तं॥ पयः पानं सुखं॥ राजभोजनाः शालयः॥ अन इति किं॥ हस्तादायः॥ भेतिकिं॥ दंतधावनं॥
करणे ल्युट्॥ कारकात्किं॥ निदर्शनं॥ मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः॥ कारकात्पराण्येतान्युत्त
रपदान्यंतोदात्तानि तत्पुरुषे॥ कृत्स्वरापवादः॥ रथवर्त्म॥ पाणिनिकृतिः॥ छंदोव्याख्यानं॥ राजशयनं॥ राजासनं॥ अश्व
स्थानं॥ ब्राह्मणयाजकः॥ गोक्रीतः॥ कारकात्किं॥ प्रभृति संगीतं॥ अत्र तादौ च निती तिस्वरः॥ सप्तम्याः पुण्यं॥ अंतोदात्तं
अध्ययने पुण्यं॥ तत्पुरुषे तुल्यार्थेति प्राप्तं॥ सप्तम्याः किं॥ वेदेन पुण्यं वेदपुण्यं॥ ऊनार्थकलहं तृतीयायाः॥ माषोनं॥ माषवि
कलो वा कलहः॥ तृतीयापूर्वपदप्रकृतिस्वरापवादोयं॥ अत्र केचिदर्थ इति स्वरूपग्रहणमिति प्रतिपदोक्तत्वादित्यसिद्धं

नकार्णवेष्टकिकमकार्णवेष्टकिकं ५

३८ कंति॥ धान्यार्थः॥ उनशब्देनत्वर्यनिर्देशार्थेनतदर्थानां ग्रहणमितिप्रतिपदोक्तत्वादेवसिद्धे तृतीयाग्रहणंस्पष्टार्थं॥ मिश्रंचानु ॥ ष॰स॰ सम
॥सि॰उ॰॥ पसर्गमसंधौ॥ पणबंधेनैकार्थसंधिः॥ तिलमिश्राः॥ सर्पिर्मिश्राः॥ मिश्रंकिं॥ गुडधानाः॥ अनुपसर्गे किं॥ तिलसंमिश्राः॥ मि
॥१६४॥ श्रग्रहणेसोपसर्गग्रहस्येदमेवज्ञापकं॥ असंधौ किं॥ ब्राह्मणमिश्रोराजा॥ ब्राह्मणैः सह संहितएकार्थ्यमापन्नः॥ नञोगु
णप्रतिषेधे संपाद्यर्हहितालमर्थाः तद्धिताः॥ संपाद्याद्यर्थतद्धितांतानञोगुणप्रतिषेधेवर्त्तमानात्परेनंतोदात्ताः॥
कर्णवेष्टकाभ्यांसंपादिकार्णवेष्टकिकं॥ छेदमर्हतिछेदिकः॥ नछेदिकोऽछेदिकः॥ नवत्सेभ्योहितोऽवत्सीयः॥ नसंतापाय
प्रभवतिअसंतापिकः॥ नञः किं॥ गार्दभरथिकोन्योगार्दभरथिकः॥ गुणोहितद्धितार्थेप्रवृत्तिनिमित्तं संपादित्वा
दुच्यते॥ तत्प्रतिषेधोयदोच्यते तत्रायंविधिः॥ कर्णवेष्टकाभ्यांनसंपादिमुखमिति॥ संपेतिकं॥ पाणिनीयमधीयतेपा
णिनीयः॥ नपाणिनीयाः॥ तद्धितंकिं॥ वोढुमर्हतिवोढा॥ नवोढाअवोढा॥ ययतोश्चातदर्थे॥ ययतौयौतद्धितौतदंत ॥१६४॥
स्योत्तरपदस्यनञोगुणप्रतिषेधविषयात्परस्यांतउदात्तः॥ पाशानांसमूहःपाश्या॥ नपाश्याऽपाश्या॥ अदंत्यः॥
अतदर्थेकिं॥ अपाद्यं॥ तद्धितंकिं॥ अदेयं॥ गुणप्रतिषेधेकिं॥ दंत्यादन्यदंत्यं॥ तेदनुबंधकग्रहणेनातदनुबंधकस्येति॥

५४ गर्दभरथमर्हतिगार्दभरथिकः विगार्दभरथिकः गुणप्रतिषेधेकिं ५४
२४ चार्वादि॰ अचरुः असाधुः राज्ञाह्मोश्छंदसि॰ अराज्ञा॰ अनाहः भाषायांनञः स्वरएव॰ ४२

वृका॰ १ नेह॥ अवामदेव्यं॥ श्र[illegible]वशाक्तौ॥ अजंतंकांतंचनञः परमंतोदात्तमशक्तौगम्यायां॥ अपचः पक्तुंनशक्तः॥ अविलिखः॥ अश
वो २ कौकिं॥ अप[illegible]दीक्षितः अदीक्षितः॥ गुणप्रतिषेधइत्येव॥ अन्योयंपचादपचः॥ आक्रोशेच॥ नञः परावच[illegible]वंतोदात्तौ वाक्रोशे॥ वृका २
अपचोजाल्मः॥ पक्तुंनशक्नोतीत्येवमाक्रोश्यते॥ अविक्षिपः॥ संज्ञायां॥ नञः परमंतोदात्तंसंज्ञायामाक्रोशे॥ अदेवदत्तः॥
कृत्योकेष्णुच्चार्वादयश्च॥ नञः परेऽन्तोदात्ताः स्युः॥ अकर्त्तव्यः॥ उकः॥ अनागामुकः॥ इष्णुच्॥ अनलंकरिष्णुः॥ इष्णुग्रह
णेखिष्णुचोप्यनुबंधकस्यापिग्रहणमिकारादेर्विधानसामर्थ्यात्॥ अनाढ्यंभाविष्णुः॥ चार्वादि॥ अचारुः॥ असाधुः॥
राज्ञाह्मोश्छंदसि॥ अराज्ञा॥ अनाहः॥ भाषायांनञः स्वरएव॥ विभाषातृन्नन्नतीक्ष्णशुचिषु॥ तृन्॥ अकर्त्ता २॥ अन्न॥ अ
नन्नं २॥ अतीक्ष्णं २॥ अशुचि २॥ पक्षेऽव्ययस्वरः॥ बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने॥ एभ्योन[illegible]या
रंतउदात्तः॥ इदंप्रथमंयस्यसः इदंप्रथमः॥ एतद्द्वितीयः॥ नसंचमः॥ बहुव्रीहौकिं॥ अनेनप्रथमइदंप्रथमः॥ तृतीयेति
योगविभागात्समासः॥ इदमेतत्तद्भ्यः किं॥ यत्प्रथमः॥ प्रथमपूरणयोः किं॥ तानिबहूनियस्यतद्बहुः॥ क्रियागणनेकिं॥
अयंप्रथमः प्रधानंयेषांतइदंप्रथमाः॥ द्रव्यगणनमिदं॥ गणनेकिं॥ अयंप्रथमएषांतेइदंप्रथमाः॥ इदंप्रधानाइत्यर्थः॥ उत्तर

४०

॥सि०कौ०॥ परस्य कार्यत्वात्कपि पूर्वमंतोदात्तं ॥ इदंप्रथमकाः ॥ बहुव्रीहावित्यधिकारः ॥ प्राग्वनं समासात् ॥ संख्यायास्तनः ॥ बहुव्रीहावं वै०स्व०समा०
तोदात्तः ॥ द्वित्तना ॥ चतुस्तना ॥ संख्यायाः किं ॥ दर्शनीयस्तना ॥ स्तनः किं ॥ द्विशिरा ॥ विभाषा छंदसि ॥ द्वित्तनां करोति ॥ संज्ञायांमि
॥२६९॥ त्राजिनयोः ॥ देवमित्रः ॥ कृष्णाजिनं ॥ संज्ञायां किं ॥ प्रियमित्रः ॥ ऋषिप्रतिषेधो मित्रे ॥ विश्वामित्र ऋषिः ॥ व्यवायिनोंतरं ॥ व्यवधा
नवाचकात्परमंतरमंतोदात्तं ॥ वस्त्रमंतरं व्यवधायकं यस्य स वस्त्रांतरः ॥ व्यवायिनः किं ॥ आत्मांतरः ॥ स्वभावोन्य इत्यर्थः ॥ मुखं
स्वांगं ॥ गौरमुखः ॥ स्वांगं किं ॥ दीर्घमुखा शाला ॥ नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः ॥ उच्चैर्मुखः ॥ प्राङ्मुखः ॥ गोमुखः ॥
स्थूलमुखः महामुखः ॥ मुष्टिमुखः ॥ पृथुमुखः ॥ पूर्वपदप्रकृतिस्वरोत्र ॥ गोमुष्टिवत्सपूर्वपदस्योपमानलक्षणोपि विकल्पोनेन बाध्यते ॥ नि
ष्ठोपमानादन्यतरस्यां ॥ निष्ठांतादुपमानवाचिनश्च परं मुखं स्वांगं वांतोदात्तं बहुव्रीहौ ॥ प्रक्षालितमुखः ॥ पक्षे निष्ठोपसर्गे
तिपूर्वपदांतोदात्तत्वं ॥ तदभावपक्षेपि पूर्वपदप्रकृतिस्वरत्वेन गतिस्वरोपि भवति ॥ उपमानः ॥ सिंहमुखः ॥ जातिकालसुखादि ॥२६९॥
धन्वा भ्यो नाच्छादनात्क्तोकृतमितप्रतिपन्नाः ॥ जातजंघः ॥ मासजातः ॥ सुखजातः ॥ दुःखजातः ॥ जातिकालेति किं ॥ पुत्रजातः ॥ अ
नाच्छादनात्किं ॥ वस्त्रछन्नः ॥ अकृतेति किं ॥ कुंड कृतः ॥ कुंडमितः ॥ कुंडप्रतिपन्नः ॥ अस्मादेव ज्ञापकान्निष्ठांतस्य परनिपातः ॥ वाजा

ते ॥ जातिकालसुखादिभ्यः परो जातशब्दोंतोदात्तः ॥ दंतजातः ॥ नञ्सुभ्यां ॥ बहुव्रीहावुत्तरपदमंतोदात्तं ॥ अव्रीहिः ॥ सुमाषः ॥ कपिपू
र्वं ॥ नञ्सुभ्यां परं पूर्वमुदात्तं कपि परे ॥ अब्रह्मबंधुकः ॥ सुकुमारीकः ॥ ह्रस्वांतेंत्यात्पूर्वं ॥ ह्रस्वांतमुत्तरपदं समासेंत्यात्पूर्वमुदात्तं नञ्
सुभ्यां बहुव्रीहौ ॥ अव्रीहिकः ॥ सुमाषकः ॥ पूर्वग्रहणं प्रकृतिभेदेन नियमार्थं ॥ ह्रस्वांते त्यादेव पूर्वमुदात्तं न कपि पूर्वमिति ॥
कवं अतोकः ॥ अव्रतस्येवांतोदात्तत्वं ॥ बहोर्नञ्वदुत्तरपदभूम्नि ॥ उत्तरपदार्थबहुत्ववाचिनो बहोः परस्य पदस्य नञः परस्येव स्व
रः स्यात् ॥ बहुव्रीहिकः ॥ बहुमित्रः ॥ उत्तेति किं ॥ बहुषु मानोस्य बहुमानः ॥ नगुणादयोवयवाः ॥ अवयववाचिनो बहोः
परे गुणादयो नांतोदात्ताः ॥ बहुव्रीहौ ॥ बहुगुणा रज्जुः ॥ बह्वक्षरं पदं ॥ बह्वध्यायः ॥ गुणादिराकृतिगणः ॥ अवयवाः किं
बहुगुणो द्विजः ॥ अध्ययनश्रुतसदाचारादयो गुणाः ॥ उपसर्गात्स्वांगं ध्रुवमपर्शु ॥ प्रपृष्ठः ॥ प्रललाटः ॥ ध्रुवमेकरूपं
उपसर्गात्किं ॥ दर्शनीयपृष्ठः ॥ स्वांगं किं ॥ प्रशाखो वृक्षः ॥ ध्रुवं किं ॥ उद्बाहुः ॥ अपर्शु किं ॥ विपर्शुः ॥ वनं समासे ॥ समासमात्रे शास्त्रे
उपसर्गादुत्तरपदं वनमंतोदात्तं ॥ तस्येदिमे प्रवणे ॥ अंतः ॥ अस्मात्परं वनमंतोदात्तं ॥ अंतर्वणो देशः ॥ उपसर्गार्थ
मिदं ॥ अंतश्च ॥ उपसर्गादंतःशब्दोंतोदात्तः ॥ पर्यंतः ॥ समंतः ॥ न निविभ्यां ॥ न्यंतः ॥ व्यंतः ॥ पूर्वपदप्रकृतिस्वरे यणि कृते उ

३८

॥सि०कौ०॥ दात्तस्वरितयोर्यणइतिस्वरितः ॥ परेरभितोभाविमंडलं ॥ परेः परमभितः उभयतोभावोयस्यास्तितत्कुशलाभिमंडलम् ॥ पं० स्व० सम कुलादि
दान्तोदात्तं ॥ परिकूलं ॥ परिमंडलं ॥ प्रादस्वांगंसंज्ञायां ॥ प्रगृह्य ॥ अस्वांगात्कं ॥ प्रपदं ॥ निरुदकादीनिच ॥ अंतोदात्तानि ॥ निरुदकं
प्रव निरुपलं ॥ अभेर्मुखं ॥ अभिमुखं ॥ उपसर्गात्स्वांगंमितिसिद्धे ऽस्वांगार्थमबहुव्रीह्यर्थमध्रुवार्थंच ॥ ●● अभिमुखाशाला ॥
॥२६६॥ अपाच्च ॥ अपमुखं ॥ योगविभाग उत्तरार्थः ॥ स्फिगपूतवीणांजोध्वकुक्षिसीरनामनामच ॥ अपादिमान्युंतोदात्तानि ॥ अपस्फिगं नाम
अपपूतं ॥ अपवीणि ॥ अंजसा ॥ अपांजः ॥ अध्वन् ॥ अपाध्वा ॥ उपसर्गादध्वनइत्यस्याभावेइदं ॥ एतदेवज्ञापकंसमासांतानां
नित्यत्वे ॥ अपकुक्षि ॥ सीरनाम ॥ अपसीरं ॥ अपहलं ॥ अपनाम ॥ स्फिगपूतवीणाकुक्षिग्रहणमबहुव्रीह्यर्थमध्रुवार्थमस्वां
गार्थंच ॥ अधेरुपरिस्थं ॥ अध्यारूढो दंतो ऽधिदंतः ॥ दंतस्योपरिदंतः ॥ उपरिस्थं किं ॥ अधिकरणं ॥ अनोरप्रधानकनीयसी
अनोः परमप्रधानवाचिकनीयश्चांतोदात्तः ॥ अनुगतोज्येष्ठमनुज्येष्ठः ॥ पूर्वपदार्थप्रधानः प्रादिसमासः ॥ अनुगतः क ॥२६६॥
नीयानन्तुकनीयान् ॥ उत्तरपदप्रधानार्थंचकनीयोग्रहणं ॥ अप्रेतिकिं ॥ अनुगतोज्येष्ठोऽनुज्येष्ठः ॥ पुरुषश्चान्वादिष्टः ॥
अनोः परोन्वादिष्टवाचि पुरुषांतोदात्तः ॥ अन्वादिष्टः पुरुषोनुपुरुषः ॥ अन्वादिष्टः किं ॥ अनुगतः पुरुषोनुपुरुषः ॥ अतेरकृत्

दे ॥ अतेः परमकृदंतंपदंशब्दश्चांतोदात्तः ॥ अत्यंकुशोनागः ॥ अतिपदा गायत्री ॥ अकृत्पदेतिकिं ॥ अतिकारकः ॥ अतेर्धातुलोपइतिवाच्यं अपरं
इहमाभूत ॥ शोभनोगार्ग्योऽतिगार्ग्यः ॥ इहचस्यात् ॥ अतिक्रांतः कारकमतिकारकः ॥ नेरनिधाने ॥ निधानमप्रकाशनंततोन्यद
निधानंप्रकाशनमित्यर्थः ॥ निमूलं ॥ न्यक्षं ॥ अनिधानेकिं ॥ निहितदंडो निदंडः ॥ प्रतेरंश्वादयस्तत्पुरुषे ॥ प्रतेः परेंऽश्वादयोंतो
दात्ताः ॥ प्रतिगतोंशुः प्रत्यंशुः ॥ प्रतिजनः ॥ प्रतिराजा ॥ समासांतस्याऽनित्यत्वान्नटच् ॥ उपाद्द्व्यजजिनमगौरादयः ॥ उपात्परंद्य
च्कमजिनंचांतोदात्तंतत्पुरुषेगौरादीन्वर्जयित्वा ॥ उपदेवः ॥ उपेंद्रः ॥ उपाजिनं ॥ अगौरादयः किं ॥ उपगौरः ॥ उपतैषः ॥ त
त्पुरुषेकिं ॥ उपगतोसोमोऽस्य उपसोमः ॥ सोरवक्षेपे ॥ सुप्रत्यवसितः ॥ सुरत्रपूजायामेव ॥ वाक्यार्थस्त्वत्रनिंदा ॥ असूयया
तथाभिधानात् ॥ सोः किं ॥ कुब्राह्मणः ॥ अवक्षेपणेकिं ॥ सुवृषणं ॥ विभाषोत्पुच्छे ॥ तत्पुरुषः ॥ उत्क्रांतः पुच्छादुत्पुच्छः ॥ यदा
तुपुच्छमुदस्यति उत्पुच्छयते एरच् उत्पुच्छः तदाथाथादिस्वरेणनित्यमंतोदात्तत्वेप्राप्ते विकल्पोयं ॥ सेयमुभयत्रविभाषा
तत्पुरुषेकिं ॥ उदस्तंपुच्छंयेन सः उत्पुच्छः ॥ द्वित्रिभ्यांपाद्दन्मूर्धसुबहुव्रीहौ ॥ आभ्यांपरेष्वेषुतोदात्तोवा ॥ द्विपाद्वेतुष्पाद्वेरुथाय
त्रिपादूर्ध्वः ॥ त्रिमूर्धानंसप्तरश्मिं ॥ मूर्धन्नित्यकृतसमासांतस्यैवमूर्धशब्दः ॥ तस्यैतत्प्रयोजनंमसत्यपिसमासांतेऽंतोदात्त

॥सि०कौ०॥ त्वं च यथा स्यात् ॥ एतदेव ज्ञापकमनित्यः समासान्तो भवतीति ॥ यदापि च समासान्तः क्रियते तथापि बहुव्रीहिकार्यत्वादेकदेशत्वा ॥ वै०स्व०स०
च्च समासान्तोदात्तत्वं पक्षे भवत्येव ॥ द्विमूर्द्धः २ त्रिमूर्द्धः ॥ द्वित्रिभ्यां किं ॥ कल्याणमूर्द्धा ॥ सक्थं चाक्रान्तात् ॥ गौरसक्थः ॥ श्लक्ष्णसक्थः
॥२६७॥ आक्रान्तात् किं ॥ चक्रसक्थः ॥ समासान्तस्य षचोऽनित्यत्वान्नित्यमेवोदात्तत्वं भवति ॥ परादिश्छन्दसि बहुलं ॥ छंदसि परस्य सन्धिपरादे
स्यादिरुदात्तो वा ॥ अंजिसक्थमालभेत ॥ अत्र वार्तिकं ॥ परादिश्च परान्तश्च पूर्वान्तश्चापि दृश्यते ॥ पूर्वादयोऽपि दृश्यन्ते व्यत्ययो बहुलं
यतः इति ॥ तुविजाता उरुक्षया ॥ परान्तः ॥ नियेन मुष्टिहत्यया ॥ पूर्वान्तः ॥ विश्वायुर्द्धेहि ॥ ॥ इति समासस्वराः ॥ ॥ ति
ङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः ॥ तिङंतात्पदाद्गोत्रादीन्यनुदात्तान्येतयोः ॥ पचति गोत्रं पचति पचति गोत्रं ॥ एवं प्रवचनप्रहसनप्र
कथनप्रत्यायनादयः ॥ कुत्सनाभीक्ष्ण्यग्रहणं पाठविशेषणं ॥ तेनान्यत्रापि गोत्रग्रहणे कुत्सनादावेव कार्यतेयं ॥ गोत्रादीनि किं
पचति पापं ॥ कुत्सेति किं ॥ खनति गोत्रं समेत्य रूपं ॥ तिङ्ङतिङः ॥ अतिङंतात्परं तिङंतं निहन्यते ॥ अग्निमीळे ॥ न लुट् ॥ लुडंतं न ॥२६७॥
निहन्यते ॥ श्वः कर्ता ॥ निपातैर्यद्यदिहंतकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तं ॥ एतैर्निपातैर्युक्तं न निहन्यते ॥ यदग्ने स्यामहं त्वं ॥ सुवाप्र
हीकथः ॥ कुविदंग ॥ आसन् ॥ अविति नेच्चेदहमाकवित् ॥ पुत्रासो यत्र पितरो भवन्ति ॥ नह प्रत्यारंभे ॥ नहेत्यनेन युक्तं तिङंतं नानु
दात्तं ॥ प्रतिषेधयुक्त आरंभः प्रत्यारंभः ॥ नह भोक्ष्यसे ॥ प्रत्यारंभे किं ॥ नह वै तस्मिंल्लोके दक्षिणमिच्छंति ॥ सत्यं प्रश्ने ॥ स

त्ययुक्तं तिङंतं नानुदात्तं प्रश्ने ॥ सत्यं भोक्ष्यसे ॥ प्रश्ने किं ॥ सत्यमिद्वा उ तं वयमिंद्रं स्तवाम ॥ अंगाप्रातिलोम्ये ॥ अंगेत्यनेन युक्तं
तिङंतं नानुदात्तं ॥ अंग कुरु ॥ अप्रातिलोम्ये किं ॥ अंग कूजसि वृषल ॥ अनभिप्रेतमसौ कुर्वन्प्रातिलोमो भवति ॥ हि च ॥ हियुक्तं तिङ
तं नानुदात्तं ॥ आ हि ष्मा याति ॥ आ हि रुहत ॥ छंदस्यनेकमपि साकांक्षं ॥ हीत्यनेन युक्तं साकांक्षमनेकमपि नानुदात्तं ॥ अनृतं हि मत्तो
वदति पाप्मानं वै नं पुनाति ॥ तिङंतद्वयमपि नानिहन्यते ॥ यावद्यथाभ्यां ॥ आभ्यां योगे तिङंतं नानुदात्तं ॥ यथा चित्त एवमावर्तते ॥ पूजा
यां नानंतरं ॥ यावद्यथाभ्यां युक्तं तिङंतं पूजायां नानुदात्तं ॥ यावत्पचति शोभनं ॥ यथा पचति शोभनं ॥ पूजायां किं ॥ सर्वं भुंक्ते ॥ अनं
तरं किं ॥ यावद्देवदत्तः पचति शोभनं ॥ पूर्वेण निघातः प्रतिषिध्यते ॥ उपसर्गव्यपेतं च ॥ पूर्वेणानंतरमित्युक्तमुपसर्गव्यवधानार्थं व
चनं ॥ यावत्प्रपचति शोभनं ॥ अनंतरमित्येव ॥ यावद्देवदत्तः प्रपचति शोभनं ॥ तुपश्यपश्यताहैः पूजायां ॥ एभिर्युक्तं तिङंतं नानिह
न्यते पूजायां ॥ आदह स्वधामनु पुनर्गर्भत्वमेरिरे ॥ अहो च ॥ एतद्योगे नानुदात्तं ॥ शेषे विभाषा ॥ अहो इत्यनेन युक्तं तिङंतं वानु
दात्तं पूजायां ॥ अहो करिष्यति ॥ पुरा च परीप्सायां ॥ पुरेत्यनेन युक्तं वानुदात्तं परीप्सायां ॥ अधीष्व माणवक पुरा विद्योतते विद्यु
त् ॥ निकटागामिन्यत्र पुराशब्दः ॥ न तेन स्म पुराधीयते ॥ चिरातीते च पुराशब्दः ॥ नन्वित्यनुज्ञैषणायां ॥ नन्वित्यनेन युक्तं ति

[४] तिङं तं नानुदात्तं अनुप्रार्थनायां ॥ ननु गच्छामि भोः अनुजानीहि मां गच्छन्तमित्यर्थः ॥ अन्वितिकिं ॥ अकार्षीः कटं त्वं [दे०स्व०ति०]
॥सि०कौ०॥ ननु करोमि ॥ पृष्टप्रतिवचनमेतत् ॥ किं क्रियाप्रश्नेनुपसर्गमप्रतिषिद्धं ॥ क्रियाप्रश्ने वर्त्तमानेन किंशब्देन युक्तं ति
॥१८९॥ ङं तं नानुदात्तं ॥ किं द्विजः पचत्याहोस्विद्गच्छति ॥ क्रियेति किं ॥ साधनप्रश्ने माभूत् ॥ किं भक्तं पचत्यपूपान्वा ॥
प्रश्ने किं ॥ किमधीते ॥ क्षेपोयं ॥ अनुपसर्गं किं ॥ किं प्रतिपचत्युत प्रकरोति ॥ अप्रतिषिद्धं किं ॥ किं द्विजो न पचति
लोपे विभाषा ॥ किमो ऽप्रयोगे उक्तं वा ॥ द्विजः पचत्याहोस्वित्पठति ॥ एहि मन्ये प्रहासे लृट् ॥ एहि मन्ये इत्यनेन
[लृ०१] युक्तं लृडन्तं नानुदात्तं क्रीडायां ॥ मन्ये भक्तं भोक्ष्यसे न हि भोक्ष्यसे भुक्तं स्वतिथिभिः ॥ प्रहासे किं ॥ एहि मन्यसे ओद
नं भोक्ष्यसे सुष्टु मन्यसे ॥ गत्यर्थलोटा लृडित्यनेनैव सिद्धे नियमार्थोयमारंभः ॥ एहि मन्ये युक्ते प्रहास एव नान्यत्र ॥ एहि
मन्यसे ओदनं भोक्ष्यसे ॥ जात्वपूर्वं ॥ अविद्यमानपूर्वं यस्माज्जातु तेन युक्तं तिङं तं नानुदात्तं ॥ जातु भोक्ष्यसे ॥ अपूर्वं किं [॥१८९॥]
देवदत्त जातु करिष्यसि ॥ किंवृत्तं च चिदुत्तरं ॥ अविद्यमानपूर्वं चिदुत्तरं स्यात्किंवृत्तं तेन युक्तं तिङं तं नानुदात्तं ॥ विभ
क्त्यन्तं डतरडतमान्तं किमोरूपं किंवृत्तं ॥ कश्चिद्भुंक्ते ॥ कतरश्चित्कतमश्चिद्वा ॥ चिदुत्तरं किं ॥ को भुंक्ते ॥ अपूर्वमित्येव
कतर०

रामः किं चित्पठति ॥ आहो उताहो चानंतरं ॥ आहो उताहो इत्याभ्यामपूर्वाभ्यां युक्तं तिङं नानुदात्तं ॥ आहो उताहो वा भुंक्ते ॥ अनंत
रमित्येव ॥ शेषे विभाषां वक्ष्यति ॥ अपूर्वेति किं ॥ देवआहो भुंक्ते ॥ शेषे विभाषा ॥ आभ्यां युक्तं व्यवहितं तिङं तं वानुदात्तं ॥ आहो
देवः पचति २ ॥ गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् ॥ गत्यर्थानां लोटा युक्तं तिङं तं नानुदात्तं ॥ यत्रैव कारके लोट् तत्रैव लृड
[ग] पि चेत् ॥ आगच्छ देव ग्रामं द्रक्ष्यसि ॥ उह्यंतां देवेन शालयः रामेण भोक्ष्यंते ॥ गत्यर्थ्यात्किं ॥ पच देव ओदनं भक्ष्यसेनं ॥ लोटा किं ॥
आगच्छसि देव ग्रामं द्रक्ष्यसि ॥ लृड्किं ॥ आगच्छ देव ग्रामं पश्यसि एनं ॥ न चेदिति किं ॥ आगच्छ देव ग्रामं पित्रा ते ओदनं भोक्ष्यते ॥
[ति] सर्व किं ॥ आगच्छ देव ग्रामं त्वं चाहं च द्रक्ष्यावः एनमित्यत्रापि निघातनिषेधो यथा स्यात् ॥ लोडंतस्य कारकं न वचनं
लृडंतेनोच्यते ॥ लोट्च ॥ लोडंतं गत्यर्थलोटा युक्तं नानुदात्तं ॥ आगच्छ देव ॥ ग्रामं पश्य ॥ गत्यर्थेति किं ॥ पच देवोदनं भुं
क्ष्वैनं ॥ लोट् किं ॥ आगच्छ देव ग्रामं पश्यसि ॥ न चेत्कारकं सर्वान्यदित्येव ॥ आगच्छ देव ग्रामं पश्यत्वेनं रामः ॥ सर्वग्रह
णान्नेह स्याद्देव ॥ ग्रामं पश्य पश्यसि ॥ न चेत्कारकं सर्वान्यदित्येव ॥ आगच्छ देव ग्रामं त्वं चाहं पश्याव ॥ योगविभाग उत्त

सार्थः ॥ विभाषितं सोपसर्गमनुत्तमं ॥ लोडन्तं गत्यर्थलोटा युक्तं वानुदात्तं ॥ आगच्छ देव ग्रामं प्रविश ॥ सोपसर्गे किं ॥ आगच्छ दे
॥सि०कौ०॥ तिङ वं ग्रामं पश्य ॥ अनु[illegible] किं ॥ आगच्छानि देव ग्रामं प्रविशानि ॥ हन्त च ॥ हन्तेत्यनेन युक्तमनुत्तमं लोडन्तं वानुदात्तं ॥ हन्त प्रविश नि
॥ सोपसर्गमित्येव ॥ हन्त कुरु ॥ निपातैर्यद्यदिति निघातप्रतिषेधः ॥ अनुत्तमं किं ॥ हन्त प्रभुनजावहै ॥ आम एकान्तरमा
॥१६९॥ मन्त्रितमनन्तिके ॥ आमः परमेकपदान्तरितमामन्त्रितं नानुदात्तं ॥ आम् पचसि देवदत्ता३ ॥ एकान्तरं किं ॥ आम् प्रपचसि दे
सि० वदत्ता३ ॥ आमन्त्रितं किं ॥ आम् पचसि देवदत्त ॥ अनन्तिके किं ॥ आम् पचसि देवदत्त ॥ यद्धितुपरं छन्दसि ॥ तिङन्तं नानुदात्तं ॥ उदसृजो यदङ्गिरः
उशन्ति हि ॥ आख्यास्यामि तु ते ॥ निपातैर्यदिति हि चेति तु परस्येति च सिद्धे नियमार्थमिदमेतेष्वेव परभूतेषु योगे नान्येष्विति ॥ आ
येस्वररोहावेहि ॥ एहीति गत्यर्थलोटा युक्तस्य लोडन्तस्य निघातो भवति ॥ चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः ॥ एषु प
रेषु परतस्तिङन्तं नानुदात्तं ॥ देवं पचति चन ॥ देवः पचति चित् ॥ देवः पचतीव ॥ देवः पचति गोत्रं ॥ देवः पचति कल्पं ॥ देवः पचति ॥१६९॥
पचति पचति ॥ अगतेः किं ॥ देवः प्रपचति चन ॥ चादिषु च ॥ चवाहाहैवेषु परेषु तिङन्तं नानुदात्तं ॥ देवः पचति च खादति च ॥ अग

तेरित्येव ॥ देवः प्रपचति च प्रखादति च ॥ प्रथमस्य च वायोग इति निघातः प्रतिषिध्यते ॥ द्वितीयं निहन्यत एव ॥ चवायोगे प्रथमा
चवेत्याभ्यां योगे प्रथमा तिङ्विभक्तिर्नानुदात्ता ॥ गाश्च चारयति वीणां च वादयति ॥ योगे किं ॥ पूर्वभूतयोरपि योगे निघा
तार्थं प्रथमाग्रहणं द्वितीया देस्तिङन्तस्य मा भूत् ॥ हेति क्षियायां ॥ हयुक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता धर्मव्यतिक्रमे स्व
यं रथेन याति३ उपाध्यायं पदातिं गमयति ॥ क्षियाशीरिति प्लुतः ॥ अहेति विनियोगे च ॥ अहयुक्ता प्रथमा तिङ्विभक्तिर्ना
उदात्ता नानाप्रयोगे नियोगे क्षियायां च ॥ त्वमह ग्रामं गच्छ त्वमह रथेनारण्यं गच्छ ॥ क्षियायां ॥ स्वयमह रथेन याति३ उपाध्या
यं पदातिं गमयति ॥ चाहलोप एवेत्यवधारणं ॥ च अह एतयोर्लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता ॥ देव एव ग्रामं गच्छतु देव
एवारण्यं गच्छतु ॥ ग्राममरण्यं च गच्छत्वित्यर्थः ॥ देव एव ग्रामं गच्छतु ॥ राम एवारण्यं गच्छतु ॥ ग्रामं केवलमरण्यं केवलं गच्छत्वित्य
र्थः ॥ इहाहलोपः स्वकेवलार्थः ॥ अवधारणं किं ॥ देव एव भोक्ष्यसे न कदाचिदित्यर्थः ॥ अनवक्लृप्तावेव ॥ चादिलोपे विभा
षा ॥ चवाहैवानां लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता ॥ चलोपे ॥ इन्द्रवाजेषु नो व ॥ शुक्ला व्रीहयो भवन्ति श्वेता गा आज्याय

इ हंति॥ वालोपे॥ व्रीहिभिर्यजेत यवैर्यजेत॥ वैवावेति च छंदसि॥ अहर्वै देवानामासीत्॥ अयं वा वहस्तआसीत्॥ एकान्याभ्यां सम
 र्थाभ्यां॥ आभ्यां युक्ता प्रथमा तिङ् विभक्तिर्वानुदात्ता छंदसि॥ अजामेकाजिन्वति॥ प्रजामेकारक्षति॥ तयोरन्यः पिप्पलं स्वाद्व
त्ति॥ समर्थाभ्यां किं॥ एको देवानुपातिष्ठत्॥ एक इति संख्यापरं नान्यार्थं॥ यद्वृत्तान्नित्यं॥ यत्र पदे यच्छब्दस्ततः परं तिङंतं ना
 नुदात्तं॥ यदज्यते॥ यदिति वक्तव्यं॥ यद्वायुर्वाति॥ अत्रव्यवहितेपि कार्यमिष्यते॥ पूजनात्पूजितमनुदात्तं॥ काष्ठादिभ्य इति व
क्तव्यं॥ पूजनेभ्यः काष्ठादिभ्यः पूजितवचनमनुदात्तं॥ काष्ठाध्यापकः॥ मलोपश्च वक्तव्यः॥ दारुणाध्यापकः॥ अत्ताताध्या
पकः॥ समासांतोदात्तत्वापवाद एव समास इष्यते॥ नेह दारुणमध्यापकः॥ इति वृत्तिमतं॥ पूजनादित्येव पूजितग्रहणेसिद्धे
पूजितग्रहणमनंतरस्याभार्थं॥ एतदेव ज्ञापकमत्र प्रकरणे पंचमीनिर्देशे विनानंतर्यमाश्रीयते इति॥ सगतिरपि तिङ्॥ पूजनेभ्यः
काष्ठादिभ्यः तिङं तपूजितमनुदात्तं॥ यत्काष्ठं प्रपचति॥ तिङ् ति तिङ् इति निघातस्य निपातैर्यदिति निषेधप्राप्ते विधिरयं॥ सग
तिग्रहणाद्गागतिरपि निहन्यते॥ गतिग्रहणे उपसर्गग्रहणमिष्यते॥ नेह यत्काष्ठं शुक्लीकरोति॥ कुत्सने च सुप्यगोत्रादौ॥ कु
त्सने च सुबंते परे सगतिरगतिरपि तिङनुदात्तं॥ पचतिपूति॥ प्रपचतिपूति॥ प्रपच ति मिथ्या॥ कुत्सने किं॥ प्रपचति शोभ